M-2634

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
शिवपंचाक्षरी मुक्तावली	विष्णुभट्ट खिरे	पुराण	अपूर्ण		3/9	54	संस्कृत	कागज				

श्रीगणेशायनमः ॥ प्रणम्यजगतामीशंविभुंसांबसदाशिवं ॥ गणेशंविघ्नहर्त्तारंगिरिंविद्याकरंगुरून् ॥
शिवपंचाक्षरीमंत्रजपहोमार्चनात्मिकां ॥ पद्धतिंतनुतेशैवविद्वान्सिद्धेश्वराह्वयः ॥ बुद्धिजालैसमाहृत्यशैवा
गमसमुद्रतः ॥ सारोक्तिमौक्तिकानीहस्वगीवग्रथितायतः ॥ अतः पंचाक्षरीमुक्तावलिरित्यभिधानकं ॥ लभते
पद्धतिरियंशिवसंतोषकारिणी ॥ मंत्रराजमिमंप्राह ब्रह्मणेरजआत्मने ॥ पंचाक्षराणिपंचास्यैरग्रहीद्भजनोयतः ॥
पंचनामाक्षराणांचसमाहारोत्रकथ्यते ॥ तान्यक्षराणिशैवानिमंत्रस्तन्मयउच्यते ॥ वाच्यःसदाशिवश्चात्रवाचकोमंत्र
ईरितः ॥ श्रुतिस्मृतिपुराणेषुतथाशैवागमेष्वपि ॥ अस्यमंत्रस्यमाहात्म्यंपौनःपुन्येनवर्ण्यते ॥ अथविस्तारभीतेननेऽ
कात्स्न्येनकथ्यते ॥ सत्यस्यभेदाबहवोनालंवक्तुंचतुर्मुखः ॥ यथामतियथाशास्त्रंशिष्टाचाराविरोधतः ॥ मंत्रस्यास्य
त्रयोभेदास्तद्विस्तारंप्रकाश्यते ॥ प्रातःकर्तव्यतो मंत्रस्नानसंध्यादिकंक्रमात् ॥ भूशुद्ध्यादिसमस्तानीन्यासजाला
निविस्तरात् ॥ ध्यानंजपार्चनेहोमतर्पणंमार्जनंतथा ॥ नित्येनैमित्तिकेकाम्येकथयामियथोचितं ॥ यदिप्रमादा
त्स्खलनंजायतेयत्रकुत्रचित् ॥ क्षंतुमर्हंतितत्संतोगुणलुब्धाहिसाधवः ॥ अथादौशमादिसंपत्तिमान्विवेक
भक्तिनम्रसरोमोक्षाद्यामुमुक्षुकामोवापुत्राद्यैहिककामोत्राधिकारी ॥ साक्षात्कृतमंत्रदेवतास्वरूपगुरुमनुरूपम

१ जना।दिनाप्रसाद्यतदनुज्ञयाशारीरशुद्ध्यर्थंप्रायश्चित्तंविधायनिर्मलोभूत्वादीक्षाविधानोक्तरीत्यागुरुतःसकाशा
त्मंत्रोपदेशंगृहीत्वातदुपयोगिकमंत्रानुष्ठानविधिंगुरुमुखादेवविज्ञायपयोक्तदेशकालाविरोधेनमंत्राभिमुखार्थं
पुरश्चरणंविधायनित्यनैमित्तिककाम्यानुष्ठानानिकुर्यात्।तत्रायंविधिः।अथादौब्राह्मेमुहूर्तेसमुत्थायश्रीगुरु
पादौस्मृत्वाप्रधानमूर्त्तिंसदाशिवंमनसाध्यात्वातदनुज्ञायानित्यकर्मानुष्ठानंकुर्यात्।प्रातःशौचादिकंस्वसु
त्रमार्गेणनिर्वर्त्यानिषिद्धदंतकाष्ठेमूलबीजस्मरणपूर्वकंदंतान्संशोध्याचम्यमुखंप्रक्षाल्यनित्यस्नानंविधा
यमंत्रस्नानंकुर्यात्।मूलेनाचम्यप्राणानायम्यश्रीसदाशिवप्रीत्यर्थंयोग्यतासिद्ध्यैमंत्रस्नानंकरिष्यइतिसं
कल्प्यमूलमंत्रस्यऋष्यादिकंस्मरेत्।।अस्यश्रीशिवपंचाक्षरीमंत्रस्य।वामदेवऋषिः।पंक्तिश्छंदः।श्रीसदाशिवोदे
वता।।ॐबीजं।नंशक्तिः।मंकीलकं।मंत्रस्नानेविनियोगः।ॐअंगुष्ठाभ्यांनमः।नंतर्जनीभ्यां०मोंमध्यमाभ्यां०
शिंअनामिकाभ्यां०वांकनिष्ठिकाभ्यां०यंकरतलकरपृष्ठाभ्यां०एवमेवषडंगन्यासंकुर्यात्।क्रौंमित्यंकुशमु
द्रयासवितृमंडलात्तीर्थमाकृष्यवमित्यमृतीकृत्यजलेषट्कोणचक्रंविचिंत्यमध्येमूलंकोणेषुषडंगानिवि
न्यस्यतत्रसदाशिवंध्यात्वामनसाभ्यर्च्यजलेदेवतात्मैक्यंविभाव्यआवाहनादिमुद्राःप्रदर्श्यमूलेनद्वादशवा। १

रं कलशमुद्धृत्य स्नायात्॥ मूलमंत्रपूर्वकं सोऽहं हंस इति निमज्योन्मज्य देवमुपसंहृत्य शुद्धवाससि परिधायाचम्य त्रि
पुंड्रधारणं कुर्यात्॥ यथोक्तविधानाकृतं भस्म श्रौताग्निहोत्रजभस्म वा सद्योजातादिपंचब्रह्ममंत्रैः परिगृह्याग्निरि
ति मूलमंत्रेणाभिमंत्र्य मानस्तोक इति समुद्धृत्य मूलषड्बीजैः शिरोललाटवक्षःस्कंधेषु तिर्यक् तिस्रो रेखाः कृत्वा मू
लेन सर्वांगमुद्धूलयेत्॥ अथ यथोक्तकृतसंस्कारान् रुद्राक्षान् प्रत्यंगे धारयेत्। शिखायामेकं। शिरसि समंतात् चत्वा
रिंशत्॥ कर्णयोः षट् षट्। गले द्वात्रिंशत्॥ अंसयोः षोडश षोडश। करयोर्द्वादश द्वादश। वक्षःस्यष्टोत्तरशतं। अथ
वा सहस्रं वा धृत्वा नित्यसंध्यांते मंत्रसंध्यामारभेत्। तत्वत्रयेण मुखेन वाचम्य प्राणानायम्य श्रीसदाशिवप्रीत्यर्थं
मंत्रसंध्यां करिष्य इति संकल्प्य स्नानवज्जलशुद्धिं विभाव्य वामहस्ते जलं गृहीत्वा करगलितोदकैर्मूलेन द्वादशवारमार्ज
नं कृत्वा शेषं जलं नासाग्रमानीय वामनाड्यांतः प्रविष्टं ध्यात्वा तेनांतःपापं प्रक्षालितं स्मृत्वा दक्षिणनाड्या बहि
र्गतं मलकलुषं जलं वामकरेण पुरः कल्पितवज्रशिलायामास्फालितं स्यै। ततो मूलेन दशवारमभिमंत्र्य जलं पी
त्वा प्राणायामपूर्वकं तत्पुरुषाय विद्महे महापुरुषाय धीमहि तन्नो रुद्रः प्रचोदयात्॥१॥ इति गायत्र्या सूर्यमंडल
वर्त्तिने सदाशिवाय इत्यनर्घ्येन इत्यर्घ्यत्रयं दत्वा सोऽहमस्मीत्यस्त्रमुपसंहृत्याचम्य प्राणानायम्य तत्पुरुषाय

२ विघ्नहे इतिसहस्रमष्टोत्तरशतंयथाशक्तिजपित्वाईशानइत्युपस्थानंकुर्यात्। ततोमूलेनवास्तुपुरुषायविघ्नइ
इत्यनेनवायथाशक्तितर्पणंकुर्यात्॥ इतिपद्मास्करीमुक्तावल्यांप्रथमःश्रेणिः। श्रीसदाशिवायनमः। ।अथदेव
तागारमागत्यपादौप्रक्षाल्यत्वम्यगंगणपतयेनमः॥ द्वारश्रीयैनमइत्युर्ध्वदेहल्यां॥ वास्तुपुरुषायनमइत्यधोदेह
ल्यां। धात्रेनमः। विधात्रेनम। इतिद्वारपार्श्वयोः। रत्नमंडपायनमइतिमंडपंप्रणम्यदक्षिणपादपुरःसरमतःप्रवि
श्यतत्रकूर्मचक्रंविचिंत्यकूर्मस्यमुखस्थानेचित्रकंबलाद्यासनपरिकल्प्यतत्रतिष्ठन्भुमींप्रार्थयेत्। पृथ्वीव्या
मेरुपृष्ठऋषिः। कूर्मोदेवतासुतलंछंदः आसनेविनियोगः॥ पृथ्वीत्वयाधृतालोकादेवित्वंविष्णुनाधृता॥ त्वं
चधारयमामांदेवीपवित्रंकुरुचासनं॥२॥ ॐ आधारशक्त्यैनमः। मंडुकाय० वराहाय० पृथिव्यै० अनंताय०
आत्मासनाय० योगासना० सुखासनाय० इत्यासनदेवताः सपूज्यदर्भान्पुष्पाणिदत्वातत्रोपविश्यस्वि
दृष्ट्यवलोकनेनदिव्यान्। ॐ अस्त्रायफट् इतरभिमंत्रितजलोत्क्षेपणेनांतरिक्षान्॥ वामपादस्यत्रिःपार्ष्णिघा
तेनभौमान्विघ्नानुत्सार्य। अपसर्पंतुयभूतायेभूताभुमिसंस्थिता॥ येभूताविघ्नकर्तारस्तेनस्यंतुशि
वाज्ञया॥ अपक्रामंतुभूतानिपिशाचाः सर्वतोदिशं॥ सर्वेषामविरोधेनब्रह्मकर्मसमारभेत्॥ इति २

नस्वाङ्गुअस्त्रायफट्नमइतिकरशुद्धिंकृत्वातेनैवोर्ध्वोर्ध्वतालत्रयंकृत्वा।दिग्बंधनंविधायनाराचमुद्रयाग्निप्राकारंत्रिशूल
मुद्रयापरितोरक्षांविधाय।मूर्ध्निगुरुभ्योनमः।परमगुरुभ्यो॰परात्परगुरुभ्यो॰परमेष्ठिगुरुभ्यो॰।दक्षिणभु
जेगणपतयेनमः।वामभुजेदुर्गायै॰क्षेत्रपालाये॰दक्षजानुनिसरस्वत्येनमः वामजानुनी।हृदिआत्मनेनम
इतिनत्वागायत्र्याप्राणानायम्यदेशकालौसंकीर्त्यश्रीसदाशिवप्रीत्यर्थंअमुककामनासिद्ध्यर्थंपंचाक्षरी
मंत्रोपासनांकरिष्यमाणस्तद्योग्यतासिद्धयेलदंगभुतप्राणप्रतिष्ठादिकंकरिष्ये इतिसंकल्पयेत्।आदौमु
लाधारस्थितांप्राणशक्तिंहंसःसोहमितिमंत्रेणसुषुम्नामार्गेणब्रह्मरंध्रंनीत्वातत्रपरमात्मनिसंयोज्यस्थूलदे
होपसंहारंभावयेत्।पादादिजानुपर्यंतंपृथ्वीस्थानंचतुरस्रंपीतवर्णंवज्रलांछितंॐलंजलेप्रविलापयामि।
जान्वादिनाभिपर्यंतमपांस्थानमर्धचंद्राकारंशुक्लवर्णंपद्मलांछितंॐवंतेजसिप्रविलापयामि।नाभ्यादिकं
ठपर्यंतंअग्निस्थानंत्रिकोणंरक्तवर्णंस्वस्तिकलांछितंॐरंवायौप्रविलापयामि॥कंठादिब्रह्मरंध्रपर्यंतंवायु
स्थानंषट्कोणंषट्बीजलांछितंॐयंआकाशेनुपसंहारयामि।भ्रूमध्यादिब्रह्मरंध्रपर्यंतंआकाशस्थानं
वर्तुलंधूम्रवर्णंध्वजलांछितंॐहंअहंकारेउपसंहारयामि।अहंकारंमहत्तत्वे॰महत्तत्वंप्रकृतौ॰प्रकृतिंसदाशि

२ वात्मकपरब्रह्मणि उपसंहृत्य सूक्ष्मशरीरोपसंहारं भावयेत्॥ ब्रह्महत्याशिरस्कंच स्वर्णस्तेय भुजद्वयं॥ सुरा
पानहृदायुक्तं गुरुतल्पकटिद्वयं॥ तत्संयोगीपदद्वंद्व मंगप्रत्यंगपातकं॥ उपपातकरोमाणं रक्तश्मश्रुविलो
चनं॥ खड्गचर्मधरंपापमंगुष्ठपरिमाणकं अधोमुखंकृष्णवर्णंदक्षकुक्षौ विचिंतयेत्॥ यमितिवायुबीजं
पूरके १६ स्मृत्वा तं पापपुरुषं शोषितं ध्यात्वा रमित्यग्निबीजेकुंभके ६४ स्मृत्वा तं पापपुरुषं दग्धं विचिंत्य मिति
वायुबीजं ३२ स्मृत्वा रेचकेन बहिर्गतं भावयेत्। वमित्यमृतबीजं मस्तके स्मृत्वामृतधारा जीवनं विचिंत्य लमि
तिपृथिवीबीजेनाधारे दृढं पिंडं संभाव्य हमित्याकाशबीजेन हृदयदेहावयवान् संचित्य स्वजीवकलां सोहं स
इति मंत्रेण स्वदेहे प्रतिष्ठां ध्यात्वा श्रीसदाशिवरूपाद्ब्रह्मणः प्रकृतिः प्रकृतेर्महान् महतोहंकारः अहंकारा
दाकाशः आकाशाद्वायुः वायुरग्निः अग्नेरापः आपः पृथिवि पृथिव्या ओषधयः ओषधिभ्योन्नं अन्नाद्रे
तः रेतः पुरुषः। इति क्रमेण संभाव्य श्रीसदाशिवरूपोहमिति भावयेत्॥ इति भूतशुद्धिः। अस्य श्रीप्राण
प्रतिष्ठामंत्रस्य ब्रह्माविष्णुरुद्रा ऋषयः। ऋग्यजुसामाथर्वाणि छंदांसि। श्रीभगवती प्राणशक्तिर्दे
ता आं बीजं। ह्रीं शक्तिः। क्रौं कीलकं। प्राणप्रतिष्ठापने विनियोगः। ॐ अं कं खं गं घं ङं। पृथिव्यप्तेजोवायव्या २

काव्यात्मने अं अंगुष्ठाभ्यां नमः॥ ॐ इं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने ईं तर्जनीभ्यां। ॐ उं टं ठं डं ढं णं
त्वक्चक्षुर्जिह्वाश्रोत्रघ्राणात्मने उं मध्यमाभ्यां। ॐ एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने ऐं अनामिकाभ्यां।
ॐ ओं पं फं बं भं मं वचनादानविहारगतिविसर्गानंदात्मने औं कनिष्ठिकाभ्यां। ॐ अं यं रं लं वं शं षं सं हं ळं क्षं मनोबु
ध्यहंकारचित्तात्मने अः करतलकरपृष्ठाभ्यां। एवं हृदयादि। अथ ध्यानं। रक्तांभोधिस्थपोतोल्लसदरुणसरो
जाधिरूढा त्रिनेत्रा पाशांकौ दंडमिक्षुद्भवमथ च गुणानं कुशं पंचबाणान्॥ बिभ्राणा सृक्कपालं त्रिनयनलसि
ता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं
हं हंसः सोहं मम प्राणा इह प्राणा मम जीव इह स्थितः। मम सर्वेंद्रियाणि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा॥
इति त्रिवारं हृदये करं दत्वा जपेत्। प्रणवस्य षोडशावृत्तिः। कृत्वा षोडश संस्कारान्भावयेत् इति प्राणप्रतिष्ठा।
अथ अंतर्मातृकान्यासः। अस्य श्री अंतर्मातृकामंत्रस्य ब्रह्मा ऋषिः गायत्रिछंदः। मातृका सरस्वती देवता।
हलो बीजानि। स्वराः शक्तयः। बिंदवः कीलकानि। अंतर्मातृकान्यासे विनियोगः। ॐ अं कं ५ आं अंगुष्ठा
भ्यां नमः। ॐ इं चं ५ ईं तर्जनीभ्यां। ॐ उं टं ५ ऊं मध्यमाभ्यां। ॐ एं तं ५ ऐं अनामिकाभ्यां। ॐ ओं पं ५ औं क

४

निष्ठिकाभ्यां० ॐ अंयं ९० अः करतलकरपृष्ठाभ्यां० एवं षडंगन्यासः॥ अथ ध्यानं॥ वर्षेरिर्पविषड्दशार्यमकलांश्च
क्षु विभक्तैः क्रमादाद्यैः सादिभिरावनानूक्षहयुतैः षट्चक्रमध्यादिमान्॥ डाकिन्यादिभिराश्रितान्यरिरवता
न्क्षसादिभिर्दैवतैर्भिदानापरदेवताविद्धतां चिंत्तेविध्यंत्तां मुदं॥ आदौ कंठपद्मे षोडशदले अकारादिं क्रमेण। न२
न्यसेत्। अं नमइत्यादि हृत्पद्मे द्वादशादले द्वादशादले कादिं गलान्न्यसेत्। ढं नमइत्यादि। नाभिपद्मे दशदले
डादिफांतान्न्यसेत्। वं नमइत्यादि स्वाधिष्ठाने षड्दले वादिलांतान्। वं नमइत्यादि। आधारे चतुर्दले वा
दिसांतान्न्यसेत्। वं नमइत्यादि। भ्रूमध्ये द्विदलपद्मे हंक्षं नमः॥ इत्यंतर्मातृकान्यासः। अथ बहिर्मातृका
न्यासः। ऋषिन्यासादिकं पूर्ववत्। ध्यानं। पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादयुक्कुक्षिवक्षोदेशां भास्वत्क
पर्दां कलितशशिकलामिंदुकुंदावदातां॥ अक्षस्रक्कुंभचिंतालिखितवरकरां त्र्यक्षणां पद्मसंस्था॥ मच्छाकल्पा
मतुच्छस्तनजघनभराभारतीं नमामि॥ १॥ ॐ अं नमइति शिरसि। आं मुखे। इं ईं नेत्रयोः। उं ऊं कर्णयोः। ऋं ॠं ई९
नासापुटयोः। लृं लॄं कपोलयोः। एं ऐं दंतपंक्त्योः। ओं औं ओष्ठयोः। अं जिह्वामूले। अः कंठे। कं दक्षबाहु
मूले। खं दक्षकूर्परे। गं दक्षमणिबंधे। घं दक्षांगुलिमूले। ङं दक्षांगुल्यग्रे। चं वामबाहुमूले। छं वामकूर्प ४

रे। जं वाममणिबंधे।। झं वामांगुलिमूले। ञं वामांगुल्यग्रे। टं दक्षऊरुमूले। ठं जानुनि। डं दक्षगुल्फे। ढं दक्षांगुलिमूले।
णं दक्षांगुल्यग्रे। पं फं कुक्षिद्वये। बं पृष्ठे। भं नाभौ। मं उदरे। यं त्वगात्म हृदये। रं रक्तात्मकंठे। लं वं बाहुमूलयोः। शं
षं हृदादिकराग्रयोः। सं हृदादिपादाग्रयोः। हं पादादिशिरःपर्यंतं। क्षं शिरआपदाग्रं। इति बहिर्मातृकान्यासः।।
अथ निवृत्त्यादि कलामातृकान्यासः।। अस्य श्रीनिवृत्त्यादि कलामंत्रस्य प्रजापतिऋषिः। गायत्री छंदः। कलासरस्वती
देवता कलान्यासे विनियोगः।। न्यासपूर्ववत्।। ध्यानं। हस्तैः पद्मं रथांगं गुणमथ हरिणं पुस्तकं वर्णमालां टंकं शूलं
कपालं वरदममलं सद्धेमकुंभं वहंती।। मुक्ताविद्युत्पयोदस्फटिकमयजपाबंधुरैः पंचवक्त्रैः। त्र्यक्षैर्वक्षोजनम्रां स
कलशशिनिभां शारदां तां नमामी।। बहिर्मातृकोक्तस्थानेषु न्यसेत्।। अं निवृत्त्यै नमः।। आं प्रतिष्ठायै नमः। इं
विद्यायै नमः। ईं शांत्यै॰ उं इंधिकायै। ऊं दीपिकायै॰ ऋं रेचिकायै॰ ॠं मोचिकायै॰ ऌं सूक्ष्मायै॰ ॡं सूक्ष्मामृतायै॰
एं ज्ञानामृतायै॰ ऐं आप्यायिन्यै॰ ओं व्यापिन्यै॰ अं कामरूपायै॰ अः अनंतायै॰ कं सृष्ट्यै॰ खं ऋद्ध्यै॰ गं स्मृत्यै॰
घं मेधायै॰ ङं कांत्यै॰ चं लक्ष्म्यै॰ छं द्युत्यै॰ जं स्थिरायै॰ झं स्थित्यै॰ ञं सिद्ध्यै॰ टं जरायै॰ ठं पालिन्यै॰ डं शांत्यै॰
ढं ऐश्वर्यै॰ णं रत्यै॰ तं कामिन्यै॰ थं वरदायै॰ दं आह्लादिन्यै॰ धं प्रीत्यै॰ नं दीर्घायै॰ पं तीक्ष्णायै॰ फं रौद्रायै॰

५ बं अभयायै ० भं निद्रायै ० मं तन्द्र्यै ० यं सुधायै ० रं क्रोधिन्यै ० लं क्रपायै ० वं उल्कायै ० शं मृत्यवे ० षं पिपासायै ०
सं अरुणायै ० हं असितायै ० क्षं अनंतायै ० इति कलान्यासः। अथ श्रीकंठन्यासः॥ अस्य श्रीकंठमातृकामं
त्रस्य दक्षिणामूर्त्ति ऋषिः। जगती छंदः। अर्धनारीनरेश्वरो देवता। हलो बीजानि। स्वराः शक्तयः। सौं कील
कं। श्रीकंठादिमातृकान्यासे विनियोगः॥ ॐ ऐं ह्रीं श्रीं अं कं ५ आं अंगुष्ठाभ्यां ० ॐ ऐं ह्रीं श्रीं इं चं ५ ईं तर्जनीभ्यां ०
ॐ ऐं ह्रीं श्रीं उं टं ५ ऊं मध्यमाभ्यां ० ॐ ऐं ह्रीं श्रीं एं तं ५ ऐं अनामिकाभ्यां ० ॐ ऐं ह्रीं श्रीं ओं पं ५ औं कनिष्ठिकाभ्यां ०
ॐ ऐं ह्रीं श्रीं अं यं १० अः करतलकरपृष्ठाभ्यां नमः॥ एवं हृदयादिन्यासः॥ अथ ध्यानं। सिंदूरकांचनसमोभ
यभागमर्धनारीश्वरीगिरिसुताहरभूषचिन्हं॥ पाशाभयाक्षवलयेष्ट दहस्तमीशां स्मृत्वा न्यसेत्सकलवां
छितवस्तुसिद्ध्यै॥ ॐ ऐं ह्रीं श्रीं अं श्रीकंठपूर्णोदरीभ्यां नमः शिरसि। सर्वत्र ॐकारबीजत्रयपूर्वकं बहिर्मातृको
क्तस्थानेषु न्यसेत्। आं अनंतेशविरजाभ्यां ० इं सूक्ष्मेशशाल्मलीभ्यां ० ईं त्रिमूर्तेशलोलाक्षीभ्यां ० उं अमरे
शवर्तुलाक्षीभ्यां ० ऊं अंबरीशदीर्घघोणाभ्यां ० ऋं भारभूतीशदीर्घमुखाभ्यां ० ॠं अतिथीशगोमुखी ५
भ्यां ० लृं स्थाणवीशदीर्घजिह्वाभ्यां ० लॄं हरेशकुंडोदरीभ्यां ० एं झिंटीशऊर्ध्वकेशीभ्यां ० ऐं भौतिकेशविकृ

तमुखीभ्यां॰ ओंसं॥ श्री। सद्योजातेश ज्वालामुखीभ्यां॰ ओं अं अनुग्रहेश उल्कामुखीभ्यां॰ अं अं क्रूरे
शश्रीमुखीभ्यां॰ अः महासेनेशसै विद्यामुखीभ्यां॰ कं क्रोधीश महाकालीभ्यां॰ खं चंडीश सरस्वतीभ्यां॰
गं पंचांतकेश सर्वसिद्धिगौरीभ्यां॰ घं शिवोत्तमेश त्रैलोक्यविद्याभ्यां॰ ङं एकरुद्रेश मंत्रशक्तिभ्यां॰ चं कूर्मेश
आत्मशक्तिभ्यां॰ छं एकनेत्रेश भूमातृभ्यां॰ जं चतुराननेश लंबोदराभ्यां॰ झं अजेश द्राविणीभ्यां॰ ञं स
र्वेशनागरीभ्यां॰ टं सोमेश खेचरीभ्यां॰ ठं लांगुलीश मंजरीभ्यां॰ डं दारुकेश रूपिणीभ्यां॰ ढं अर्धनारीश
वीरिणीभ्यां॰ णं उमाकांतेश काकोटरीभ्यां॰ तं आषाढीश पूतनाभ्यां॰ थं दंडीश भद्रकालीभ्यां॰ दं अत्रीश
योगिनीभ्यां॰ धं मीनेश शंखिनीभ्यां॰ नं मेषेश गर्जिनीभ्यां॰ पं लोहितेश कालरात्रीभ्यां॰ फं शखीनी
शकुकुदिनीभ्यां॰ बं छगलंडेश कपर्दिनीभ्यां॰ भं द्विरंडेश वज्रिणीभ्यां॰ मं महाकालेश विजयाभ्यां॰ यं बा
लीश सुमुखीभ्यां॰ रं भुजंगेश रेवतीभ्यां॰ लं पिनाकीश माधवीभ्यां॰ वं खड्गीश वारुणीभ्यां॰ शं बके
श वायवीभ्यां॰ षं श्वेतेश रक्षोवधारणीभ्यां॰ सं भृग्वीश सहजाभ्यां॰ हं नकुलीश लक्ष्मीभ्यां॰ क्षं संवर्तकेश
महामायाभ्यां॰ इति श्रीकंठमातृकान्यासः॥ अथ पीठन्यासः॥ मूर्ध्नि दक्षिणे गुरुभ्यो नमः॥ वामे गणप

६ ग

तयेनम। ॐ अधः आधारशक्त्यैनमः। मूलेप्रकृत्यैनम कालाग्निरुद्राय॰ महामंडूकाय। आदिकूर्माय॰
वराहाय। अनंताय। पृथिव्यै। अमृतार्णवाय। रत्नद्वीपाय। हिमगिरये। नंदनोद्यानाय। कल्पवृक्षाय। म
णीभूतलाय। रत्नमंडपाय। रत्नसिंहासनाय। इत्याधारादिहृदयपर्यंतमुपर्युपरिन्यसेत्। धर्मायदक्षोरु
मूले। ज्ञानायदक्षांसे। वैराग्यायवामांसे। ऐश्वर्याय वामोरुमूले। अधर्मायनाभौ। अज्ञानायदक्षिणपार्श्वे। अवै
राग्यायमुखे। अनैश्वर्याय वामपार्श्वे। मध्येरंसत्वाय। रं रजसे। तं तमसे। मं मायायै। विं विद्यायै। कं कदायै
नंनालाय। पंपद्माय। दं दलेभ्यो। कं केसरेभ्यो। कं कर्णिकायै। अं अर्कमंडलाय। उं सोममंडलायै। मं वह्निमंड
लाय। अं आत्मने। उं अंतरात्मने। मं परमात्मने। ॐ ज्ञानात्मने। अथप्रागादि। वामायै॰ ज्येष्ठायै॰ रौद्रायै॰ का
ल्यै॰ कलविकरिण्यै॰ बलप्रमथिन्यै॰ सर्वभूतदमन्यै॰ मध्येमनोन्मन्यै॰ ॐ नमोभगवतेसकलगुणात्म
शक्तियुक्तानंतयोगपीठात्मनेनमः॥ इतिसर्वांगेषुव्यापकंइतिपीठन्यासः॥ अथप्रधानन्यासः। मूलेनप्राणाना
यम्यंऋष्यादिन्यासान्कुर्यात्। ॐ अस्यश्रीशिवपंचाक्षरीमंत्रस्य। वामदेवऋषिः शिरसि। पंक्तिछंदः मुखे। श्री
सदाशिवोदेवताहृदये। ॐ बीजंनाभौ। उं शक्तिः गुह्ये। मं कीलकंसंधिषु। शक्तिपंचाक्षरीप्रासादपंचाक्षरयोः ६

ॐ मं मध्यमाभ्यां॰

ह्रीं शक्तिः। अन्यात्सर्वं समानं। श्रीसदाशिवप्रीत्यर्थे जपादौ विनियोगः॥ ॐ कारस्य ब्रह्मा ऋषिः। देवीगाय
त्री छंदः। परमात्मा देवता। शुद्धस्फटिकवर्णं सर्वव्याप्य स्थाने विनियोगः॥ मकारस्य अत्रि ऋषिः। अनुष्टुप् छंदः।
विष्णुर्देवता। धूम्रवर्णः। पश्चिममुखस्थाने विनियोगः। यकारस्य भारद्वाज ऋषिः। विराट् छंदः। स्कंदो देवता। श्वे
तवर्णः ऊर्ध्वमुखे विनियोगः। अथ मूलेन करशुद्धिं व्यापकं विधाय करांगन्यासं कुर्यात्॥ ॐ ॐ अंगुष्ठाभ्यां॰ ॐ
ॐ नं तर्जनीभ्यां॰ ॐ शिं अनामिकाभ्यां॰ ॐ वां कनिष्ठिकाभ्यां॰ ॐ यं करतलकरपृष्ठाभ्यां नमः॥ एवमेव षडंगेषु॥ ॐ द
इदं शुद्धपंचाक्षर्यां॥ शक्तिपंचाक्षरीप्रासादपंचाक्षर्योस्तु भेदः। ॐ ह्रां १ ॐ नं ह्रीं २ ॐ मों ह्रूं ३ ॐ शिं ह्रैं ४ ॐ वां ह्रौं ५
ॐ यं ह्रः ६। इति शक्तिपंचाक्षरीषडंगन्यासः। ॐ ॐ ह्रीं १ ॐ नं ह्रीं २ ॐ मों ह्रीं ३ ॐ शिं ह्रीं ४ ॐ वां ह्रीं ५ ॐ यं ह्रीं ६
इति प्रासादपंचाक्षरीन्यासः। अथ स्थितिन्यासः। ॐ ॐ हृदयाय नमः। ॐ नं गुह्याय॰ ॐ मं पादाभ्यां॰ ॐ शिं मू
र्ध्ने॰ ॐ वां मुखाय॰ ॐ यं कंठाय। अथ सद्योजातादिन्यासः। तत्रादौ तर्जन्यादिन्यासः। ॐ नं तत्पुरुषाय तर्जनीभ्यां॰ ॰
ॐ मों अघोराय मध्यमाभ्यां॰ ॐ शिं सद्योजाताय अनामिकाभ्यां॰ ॐ वां वामदेवाय कनिष्ठिकाभ्यां॰ ॐ यं ई
नं॰ ११ शानाय अंगुष्ठाभ्यां॰॥ अथांगन्यासः। ॐ नं तत्पुरुषाय मुखे॰ ॐ मं अघोराय हृदये॰ ॐ शिं सद्योजाताय पादयोः।

८

वां० १ ॐ वामदेवायगुह्ये। ॐ यं ईशानायमूर्ध्नि। अथ पंचवक्त्रंन्यासः॥ ॐ नं तत्पुरुषाय पूर्वमुखाय। ॐ मं अघोराय दक्षिणमुखाय। ॐ शिं सद्योजाताय पश्चिममुखाय। ॐ वां वामदेवायोत्तरमुखाय। ॐ यं ईशानायोर्ध्वमुखाय। शुद्धपंचाक्षरमिव कर्तव्यं। अथ सद्योजातादिकलान्यासः॥ सद्योजातं प्रपद्यामि सिध्यै। सद्योजाताय वै नमो नमः ऋध्यै। भवधृत्यै। अभवे लक्ष्म्यै। नातिभवे मेधायै। भवस्व मां प्रज्ञायै। भवे प्रभायै। उद्भवाय सुधायै। पादयोस्तनयोर्नासिकयोर्मूर्ध्नि। इत्यष्टौ सद्योजातकलाः कनिष्ठांगुष्ठयोगेन न्यसेत्। वामदेवाय रजस्यै। ज्येष्ठाय रक्षायै। रुद्राय रत्यै। कालाय पालिन्यै। कलकामायै। विकरणाय संयमिन्यै। बलक्रियायै। विकरणाय वध्यै। बलस्थिरायै। प्रमथनाय रात्र्यै। सर्वभूतदमनाय। भ्रामण्यै। नमो मोहिन्यै। मनोन्मनाय ज्वरायै। गुह्यवक्षणोरुजान्वनुजंघास्फिक्कुक्षिकटिपार्श्वयोः ॥ १ ॥ तास्त्रयोदश वामदेवकला अंगुष्ठानामिकायोगेन न्यसेत्। ॐ अघोरेभ्यो अघोरेभ्योत्तमायै हरये। घोरेभ्यो मोहिन्यै कंठे। अघोरेभ्यो दक्षिणांशे। घोरतरेभ्यो निद्रायै वामांशे। सर्वेभ्यो व्याधिन्यै नाभौ। सर्वसर्वेभ्यो मृत्यवे जठरे। नमस्ते अस्तु क्षुधायै पृष्ठे। रुद्ररूपेभ्यो तृषायै उरसि। इत्यघोरस्याष्टौ कलाः अंगुष्ठमध्यमायोगेन न्यसेत्। ॐ तत्पुरुषाय विद्महे रुद्रांत्यै नमः पूर्वमुखे। महादेवाय धीम ८

क्षि विद्यायै पश्चिममुखे। तन्नो रुद्रः प्रतिष्ठायै दक्षिणमुखे। प्रचो दयात् निवृत्त्यै मुखे। तत्पुरुषस्य तिस्रः कला। अंगुष्ठतर्जनीयोगेन न्यसेत्। ईशानः सर्वविद्यानां शान्त्यै ऊर्ध्वा ईश्वरः सर्वभूतानामं गदायै पूर्व मूर्ध्नि ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा रात्र्यै दक्षिणमूर्ध्नि।। शिवो मेऽस्तु मरीच्यै उत्तर मूर्ध्नि। सदाशिवोंशाय च अक्षर्यांश्चतुर्दशलक्षजपः। त्रिमधुप्लुतं राजवृक्षसमिद्भिर्दशांशहोमः।। अंशुमालि अर्द्धनारीश्वरात्म प्रसादपंचाक्षर्या अष्टलक्षजपः घृतपायसान्नदशांशहोमः। अंशुमालिन्यै पश्चिममूर्ध्नि। इतीशानकलाः।। अंगुष्ठेनतासां न्यासः स्याल्लिंगमुद्रया। इत्यष्टत्रिंशत्कलान्यासः। अथ शक्तिन्यासः। ॐ ॐ सर्वज्ञशक्तिधाम्ने हृदयाय नमः।। ॐ नं तृप्तिधाम्ने शिरसे स्वाहा। ॐ मं अनादिशक्तिधाम्ने शिखायै वषट्। ॐ शिं शक्तिधाम्ने कवचाय हुं। ॐ वां अलुप्तशक्तिधाम्ने नेत्रत्रयाय वौषट्। ॐ अनंतशक्तिधाम्ने अस्त्राय फट्। इति शुद्धपंचाक्षर्यां। शक्तिप्रासादपंचाक्षर्योः षडंगोक्तस्वस्वबीजपूर्वकं कुर्यात्। अथ गोलन्यासः। ॐ ॐ हृदयाय नमः। ॐ नं मुखाय नमः। ॐ मं दक्षिणांसाय नमः। ॐ शिं वामांसाय। ॐ वां दक्षिणोदरे। ॐ यं वामोदरे। ॐ ॐ कंठमूलाय। ॐ नं नाभौ ॐ मं दक्षिणपार्श्वाय। ॐ वां पृष्ठाय। ॐ यं हृदयाय २। ॐ ॐ मूर्ध्नि। ॐ नं अंसयोः। मं दक्षिणनेत्राय। ॐ शिं वाम

१ ॐ शिं वामपार्श्वाय।

८

नेत्राय। ॐ वं दक्षिणघ्राणाय। ॐ यं वामघ्राणाय ३ ॐ ॐ दक्षिणबाहुमूले। ॐ नं दक्षिणकूर्पराय। ॐ मं दक्षिणम
णिबंधाय। ॐ शिं दक्षिणांगुलिसंधिभ्यः। ॐ वां दक्षिणांगुलिमध्यसंधिभ्यः।।४।। ९ वं वामकरे ५। ॐ दक्षोरुमूले ।
ॐ नं दक्षजानुनि। ॐ मं दक्षगुल्फे। ॐ शिं दक्षपादांगुलिमूले। ॐ वां दक्षपादांगुलिसंधिषु। ॐ यं दक्षपादांगुल्यग्रेषु। ६
९ वं वामपादे ७। ॐ ॐ शिरसे नमः। ॐ नं वक्त्राय। ॐ मं हृदयाय ० ॐ शिं जठराय ० ॐ वां ऊरुभ्यां ० ॐ यं पादाभ्यां ०।८।
ॐ ॐ हृदयाय ० ॐ नं मुखाय ० ॐ मं दक्षिणभुजाय ० ॐ शिं वामभुजाय ० ॐ वां दक्षिणबाहवे ॐ यं वामबाहवे ।९ ॐ ॐ मु
खाय। ॐ नं अंसाभ्यां। ॐ मं हृदयाय। ॐ शिं पादाभ्यां। ॐ वां ऊरुभ्यां ० ॐ यं कुक्षिभ्यां।१०। ९ वं दशविधंन्यासं कृत्वा। ॐ
नं भालाय। ॐ मं अधराय। ॐ शिं दक्षांसाय। ॐ वां वामांसाय। ॐ यं हृदयाय ० इति कुर्यात्। पादादिशिरसपर्यंतं शि
रसादिपादपर्यंतं कराभ्यां त्रिवारं गोलकंन्यासं कुर्यात्। ९ वं शुद्धे। शक्तिप्रासादयोः पूर्वोक्तबीजपूर्वकमेवं कुर्यात्।
अथ चक्रन्यासः। ॐ ॐ हृदयाय ० ॐ नं शिरसे स्वाहा ० ॐ मं शिखायै वौषट्। ॐ शिं कवचाय हुं ० ॐ वां नेत्रत्रय
य वौषट्। ॐ यं अस्त्राय फट्। ततो मूलमंत्रेस मग्रं दशदिक्षु प्रत्यकं विन्यसेत्। गणपतिमातृकादुर्गाक्षेत्रपा
लान् आग्नेयादिकोणेषु न्यसेत्। ईशान इति मंत्र शांत्यातीतायै नमः शिरसि। तत्पुरुषायेति मंत्रं शांत्यै नमः

८

मुखे। अघोरेभ्यइतिमंत्रस्थित्यैनमः। हृदि। वामदेवायइतिमंत्रप्रतिष्ठायैनमः। गुह्ये सद्योजातमितिमंत्रविद्यै
नमः पादयोः। अनंतायनमः मुखे। सूक्ष्मायशिवोत्तमायपार्श्वयोः। एकनेत्राकंठे। एकरुद्रायत्रिमूर्तयेअंसयोः। श्री
कंठाय शिखंडिनेस्तनयोः। नंदिनेललाटे। महाकालायवामांसे। गणपतयेवामपार्श्वे। वृषभायनाभौ। भृंगिरि
टिनेनमः दक्षिणपार्श्वे। स्कंदायदक्षांसे। उमापतयेअपरगले। चंडीश्वरायहृदये। इंद्रायदक्षिणपादे। अग्नयेदक्षिण
जानुनि। यमायजानुनीपार्श्वे। निर्ऋतयेदक्षजानुनीस्कंधे। वरुणायवामस्कंधे। वायवेवामपार्श्वे। कुबेरायवामजा
नुनी। ईशानायवामपादे। ब्रह्मणेमस्तके। अनंतायमूलाधारे। एवंन्यासविधिंकृत्वापरमेश्वरानुसंधानार्थमिमं
मंत्रंपठेत्। नमोस्तुस्थाणुरूपायज्योतिर्लिंगामृतात्मने। चतुर्मूर्तिवपुश्छायभासितांगायशंभवे।। एवंभक्त्या
नुसंधायध्यायेद्देवंसदाशिवं।। बिभ्राद्दोर्भिःकुठारंमृगमभयवरंसुप्रसन्नोमहेशः।। सर्वालंकारयुक्तःसरसिजनि
लयोव्याघ्रचर्मात्तिवासाः।। ध्येयोमुक्तापरागामृतरसकलिलाद्रिप्रभःपंचवक्त्रस्त्र्यक्षःकोटिघटिततुहिनरो
चिष्कलोत्तुंगमौलीः।। इतिशुद्धपंचाक्षरीध्यानं।। अथबालिकापंचाक्षरीध्यानं।। वंदेहस्तवरदशूलकपालहस्तांसा
भीतिमुद्राननयोज्वलदेहकांतिं।। वामांकपीठगतयानिजवामहस्तन्यस्तारुणोत्पलयुजापरिरब्धदेहं।। अथ

९

प्रासादपंचाक्षरीध्यानं॥ वामांकन्यस्तवामेतरकरकमलायास्तयावामबाहुन्यस्तारक्तोत्पलश्यामनिविद्धता
त्रसद्वामबाहुप्रियायाः॥ सर्वाकल्पाभिरामोध्येयनपरमसुरगः। सीवदःकांचनाभोध्येयःपद्मासनस्थःस्मरल
लितवपुःसंपदोपार्वतीशः॥ एवंक्रमेणयथोपदेशंध्यात्वाप्रार्थनापूर्वकंहृत्कमलेसदाशिवस्यासनादिकंप
रिकल्प्यमानसैरुपचारैःसंपूजयेत्। तत्रषोडशोपचारान् अथवापंचोपचारान्कल्पयेत्॥ पृथिवीत
त्वात्मनेगंधं। व्योमतत्वा त्मनेपुष्पं। वायुतत्वात्मनेधूपं। तेजस्तत्वात्मनेदीपं। अमृततत्वात्मनेनैवेद्यं। प
रिकल्पतलःसदाशिवोहमितिसंभाव्यशिवविग्रहसन्गंधपुष्पाक्षतैरात्मानंसकलीकृत्यगुरूपदेश
मार्गेणमूलमंत्रंतदर्थानुचिंतनपूर्वकंजपेत्॥ मूलमंत्रस्वरूपंतुशुद्धपंचाक्षरीमंत्रोद्विजादित्रैवर्णिकानांॐका
रपूर्वकंषडक्षरः। तेषामोंकारस्यवेदादिभूतत्वात्तत्राधिकारः। न्यासेष्वपिॐकारपंचब्रह्ममंत्रैर्विनान्य
त्कर्तव्यं। शक्तिपंचाक्षरीमंत्रस्यादौप्रणवस्ततोमायाबीजंमध्येपंचाक्षरीपुनर्मायाबीजमेवमष्टाक्ष
रीश्वरात्मकाप्रासादपंचाक्षरीमंत्रस्यादौप्रणवस्ततोमायाबीजंततःप्रसादबीजंअंतेपंचाक्षरीएवमष्टा
क्षरी॥ पुरश्चरणेशुद्धपंचाक्षर्याश्चतुर्विंशतिलक्षजपः॥ भुक्तिस्तैःपायसैर्वासर्पिषादशांशंजुहुयात्। तेषुनि ९

त्यजपे१००८ संख्यायथाशक्तिवानेमित्यकाम्यजपवक्ष्यमाणेनप्रकारेणकुर्यात्॥ जपेविधिर्वाचिकमुपांशुमानसमि
२२ तित्रिःप्रकारस्तेषुत्रयथासंभवविधिनाजपेत्॥ जपविधिर्वाचिकमुपांशुगणनारुद्राक्षात्रितात्विकाभिकार्या॥
१तेषांलक्षणानिपुरतोवक्ष्यामः॥ जपादौप्रधानमुद्रांलदायुधमुद्राश्चदर्शयेत्॥ जपांतेमूलेनप्राणानायम्यषडं
गविधायध्यात्वा॥ शिवाज्ञयाविरमेत्॥ इतिशिवपंचाक्षरीमुक्तावल्यांन्यासजपविधानामद्वितीयश्रेणिः॥ इति
शाकुत्यं॥ अथपूजाविधिरभिधीयते॥ पूजामंडपप्रासाद्यपाणिपादौप्रक्षाल्याचम्यमंडपस्येशानभोगेस्थित्वा॥ ॐ
सूर्यायनमः॥ क्षंक्षेत्रपालाय० इतिनत्वाकपाटमुद्घाटयेत्॥ अथपूर्वद्वारमागत्यद्वारपार्श्वयोः दक्षिणेनंदिनेनमः॥
वामेमहाकालाय० विघ्नेश्वराय० मायाशक्त्यै० धात्रेनमः॥ विधात्रे० यमुनायै० शंखनिधयेनमः॥ पद्मनिधये० ऊर्ध्वे
द्वारश्रियै० अधोवास्तुपुरुषाय० इतिसंपूज्य॥ दक्षिणद्वारमगत्य॥ द्वारपार्श्वयोः स्वर्णनिधये० रत्ननिधये० ऊर्ध्वे
द्वारश्रियै० अधोवास्तुपुरुषाय० इतिसंपूज्य॥ पश्चिमद्वारमागत्य॥ द्वारपार्श्वयोः दक्षिणेभगवतेस्कंदायविघ्ने
श्वरायमायाशक्त्यैधात्रे विधात्र्यामीमायै॥ कच्छपवेण्यै० पद्मनिधयेविश्वनिधये॥ ऊर्ध्वद्वारश्रियै० अधोवास्तुपुरुषाय०
इतिसंपूज्यउत्तरद्वारमागत्य॥ द्वारपार्श्वयोः दक्षिणेउमायैवामेचंडेश्वरायविघ्नेश्वराय॥ मायाशक्तिधात्रेविधात्रेकावे

१० यैतुंगभद्रायै धननिश्चयगुप्तनिश्चयै। ऊर्ध्वद्वारश्रियै अधोवास्तुपुरुषाय नमः॥ इतिसंपूज्य समस्तपरिवारसहितश्रीस
दाशिव मंडपाय नमः इतिसंपूज्य प्रणमेत्॥ अथास्त्रमंत्रेण जलमभिमंत्र्य पुष्परूपं [illegible] नाराचमुद्रया मंडपे विनिक्षिप्य
क्रूरदृष्टिनिरीक्ष्य पक्ष्मानखोटिकया विघ्नसंघातानुच्चाटयनिर्गच्छितांतेषां स्ववामांगसंकोचनेन पुरतो मार्गं दत्वावि
घ्नान्बहिर्निष्कास्य पश्चिमद्वारदक्षिणपादपुरःसरमलः। प्रविश्य मंडपमध्ये ॐ वास्तुपुरुषाय नमः इतिसंपूज्य चित्रकं
बलद्यासने प्राङ्मुखोदङ्मुखो वा उपविश्य मूलेन शिखां बध्वा गुर्वादीनभिवंद्य गायत्र्या प्राणानायम्य देशकालौ संकीर्त्य
श्रीसदाशिवप्रीत्यर्थं अमुककामनासिध्यर्थं यथासंभावितोपचारैः श्रीसदाशिवपूजां करिष्ये तदंगभूतशुध्यादिकं क
रिष्ये इतिसंकल्प्य॥ प्राणप्रतिष्ठादि कं पूर्ववत्कृत्वा मूलेन प्राणानायम्य पूर्वोक्तऋष्यादिन्यासान् कृत्वा
स्वपुरतो वामभागे अस्त्रप्रक्षालितं मूलमंत्रपूरितोदकं शंखं दक्षिणे पत्रपुष्पाणि दीपपात्राणि मध्ये पाद्यादिपात्राणि
गंधादिकं पुरतो निधाय आदौ शंखपूजां कुर्यात्॥ गोमयेनोपलिप्य मत्स्यमुद्रया त्रिकोणषट्कोणवृत्तचतुरस्रयंत्रं सं
लिख्य दक्षिणकरेण शंखमुद्रया माबध्य त्रिकोणे वह्निदलकलात्मने नमः। धूम्रायै नमः। ज्वलिन्यै नमः। ज्वालिन्यै न०
विस्फुलिंगिन्यै नमः। सुश्रियै नमः। स्वरूपायै नमः। कपिलायै नमः। हव्यवाहायै। कव्यवाहायै। इतिसमभ्यर्च्य। षट् १०

कोणेषु आग्नेयेहृदयमंत्रं।ईशान्यैंशिरोमंत्रं।नैर्ऋत्येशिखामंत्रं।वायव्येकवचमंत्रं।पुरतोनेत्रमंत्रं।सर्वतोस्त्रमंत्रं।स
मभ्यर्च्यमध्येशंखंप्रतिष्ठाप्यसंसूर्यमंडलायद्वादशकलात्मकायनमः।तपिन्यै०धूम्रायै०मरीच्यै०ज्वालिन्यै०रुच्यै०
सुषुम्नायै०भोगदायै०बोधिन्यै।धारिण्यै०क्षमायै।इतिशंखोपरिअभ्यर्च्य।हृन्मंत्रेणगंधपुष्पाक्षतान्क्षि
प्यप्रतिलोममातृकयाशिरोमंत्रेणचतीर्थमापूर्यतंसोममंडलायषोडशकलात्मनेनमः॥अमृतायै।मा
नदायै०पूषायै।तुष्ट्यै।रत्यै।धृत्यै।शशिन्यै।चंद्रिकायै०कांत्यै०ज्योत्स्नायै।श्रियंगदायै।पूर्णामृतायै।का
मदायै।इतिशंखजलेसमभ्यर्च्य।तस्मिन्गंगे यमुने चैवगोदावरीसरस्वती॥नर्मदे सिंधुकावेरिजलेस्मिन्स
न्निधिंकुरु।क्रोमित्यंकुशमुद्रयासवितृमंडलात्तीर्थमाकृष्यामृतीकृत्यतत्रावाह्यश्रीसदाशिवंध्यात्वावारुण
दिमुद्राःप्रदर्श्य।शिखामंत्रेणगालिनीमुद्रयातज्जलंकुर्यात्।कवचमंत्रेणगरुडमुद्रयानिर्विषकुर्यात्।न
यनमंत्रेणसुरभ्यमृतमुद्रयाअमृतदृष्टिनिक्षेपेणचतज्जलममृतंकुर्यात्।पुनःकवचमंत्रेणसुरक्ष्याथसकली
कृत्यतदंगेषुअंगानिविन्यस्यमूलेनगंधपुष्पाक्षतैरभ्यर्च्यहस्तेनाच्छाद्यसप्तवारंमूलमंत्रेणाभिमंत्र्यचक्रमुद्रया
संरक्ष्यतच्छंखजलंकिंचित्कूर्चजलेमिश्रयित्वाकलशंशंखवत्संस्कृत्यशंखजलंकिंचिदुपपात्रेगृही

११ त्वास्त्रमंत्रेणात्मानंयागभवनंपूजोपस्कारांश्चसंप्रोक्षयेत्॥ अथमूलेनषडंगंविधायश्रीसदाशिवंध्यात्वा।
मानसैरुपचारैःसंपूज्यशिवोऽहमितिसंभाव्यगंधपुष्पैरात्मानंसंकलीकृत्यमूलेनपुष्पत्रयंस्वशिरसिनिधाय
धूपदीपौसंकल्प्यमूलमंत्रमुच्चरन्अमृतमास्वाद्यनैवेद्यंविभाव्यदेवतामयविग्रहःसन्मूलमंत्रंयथाशक्ति
जपित्वा। गुह्यातिगुह्यगोप्तात्वंगृहाणास्मत्कृतंजपं॥ सिद्धिर्भवतुमेदेवत्वत्प्रसादान्मयिस्थितः॥ इतिजपंदेवा
यनिवेद्यपुष्पादिकमाघ्रायकुंभोदरायनमइतिवामभागेनिक्षिप्यहस्तप्रक्षालनंस्थलशुद्धिंविधायपूजामूर्तेर्म
लापकर्षणस्नानंकारयित्वा। पुष्पैरलंकृत्यपीठेसंस्थाप्यपीठपूजांकुर्यात्॥ देवस्यदक्षिणेस्वगुरुपंक्तीन्गंधा
दिभिरभ्यर्च्य। वामेगणपतये। दुर्गायै। क्षेत्रपालाय। सरस्वत्यै। पीठपश्चिमादिभागे। आधारशक्त्यै। मूलप्र
कृत्यैनमः। कालाग्निरुद्राय। महामंडूकाय। आदिकूर्माय। वराहाय। अनंताय। पृथिव्यै। अमृतार्णवाय।
रत्नद्वीपाय। हेमगिरये। नंदनोद्यानाय। कल्पवृक्षाय। मणिभूतलाय। रत्नमंडपाय। रत्नसिंहासनाय।
इत्युपर्युपरिपूजयेत्॥ तदुपरिचतुरस्रपीठंपरिकल्प्यपीठपादेषुआग्नेयादिविदिक्षु। धर्माय। ज्ञानाय। वैरा
ग्याय। ऐश्वर्याय। पीठगात्रेषुप्रागादिदिक्षु। अधर्माय। अज्ञानाय। अवैराग्याय। अनैश्वर्याय। पीठम ११

ध्ये। संसत्वाय। रं रजसे। तंतमसे। मांमायायै। विंविद्यायै। कंकलायै। नंनालाय। पंपद्माय। दंदलेभ्यो। कंके
सरेभ्य। कंकर्णिकायै। अंअर्कमंडलाय। उंसोममंडलाय। वंवन्हिमंडलाय। ॐ आत्मने। उंअंतरात्मने। पंपर
मात्मने। ॐ ज्ञानात्मे। इतिसमभ्यर्च्य प्रागादिदलेषु। मायायै। ज्येष्ठायै। रौद्र्यै। काल्यै। कलविकरण्यै बलवि
करण्यै। बलप्रमथिन्यै। सर्वभूतदमन्यै। मध्ये मनोन्मन्यै। ॐ नमो भगवते सदाशिवाय सकलगुणात्मशक्ति
युक्तानंतात्मयोगपीठात्मने नमः इतिपीठंसमभ्यर्च्य। स्वहृदयस्थितां मूलमंत्रमूर्त्तिधारणीं गुरुस्वरूपां सपरि
वारां देवतां ध्यात्वा दीपाद्दीपांतरमिव मूर्त्तेः सकाशान्निर्गतां देवतां मूर्त्तिसुषुम्नानाड्या बहिर्निर्गमिमध्यपद्मपु
ष्पाक्षतसहितं स्वांजलौ वानीय सर्वांतर्यामिनं गुरुस्वरूपं भक्तानुग्रहगृहीतविग्रहं ज्योतिर्मयं सर्वमंगलात्मकं।
सपरिवारं भगवंतं श्रीसदाशिवमावाहयामीत्युच्चरन् मूलमंत्रपूर्वकमावाहिन्या मुद्रया मूर्त्तावावाह्य पुनर्मूलमंत्रे
मुच्चार्य सर्वात्मन्। भगवन् स्थापिनी मुद्रया स्थापितोभव। सन्निधान्या सन्निहितः। सन्निरोधनीमुद्रया स
न्निरुद्धः। अवगुंठिनीमुद्रया ऽवगुंठितः। सम्मुखीमुद्रया सम्मुखः। प्रसादिन्या प्रसन्नः। अमृतमुद्रयामृ
तीभवइत्युच्चरन्। क्रमेणामुद्रायाश्चदर्शयेत्। देवतामूर्त्तेः करन्यासकर्ममित्वा मूलेन षडंगन्यासं विन्यसेत्प्र

१२ धानमुद्रास्तदासुधमुद्राश्च दर्शयेत्। अथपाद्यार्घ्याचमनमधुपर्कार्थंचत्वारि पात्राण्यासाद्यअस्त्रेणसंक्षाल्यतदर्ह
द्रव्याणितेषुमूलमंत्रेणाप्रक्षिप्यसुरभिमुद्रयामृतमास्थाय मूलेनाभिमंत्र्यगंधपुष्पेनिधाय मूलमंत्रपूर्वकं अं
न्नदलेषुषडंगैर्द्वितीयावरणं॥ अष्टदलपद्मस्यमूलेषु प्रागादिहृल्लेखायै। रक्तायै। करालिकायै। महाच्छु
ष्मायै। गायत्र्यै। सावित्र्यै। सरस्वत्यै। इतितृतीयावरणं। तद्दलमध्येषुप्रागादि। वृषभाय। क्षेत्रपालाय। चं
डीश्वराय। दुर्गायै। स्कंदाय। नंदिने। विघ्नेश्वराय। सेनापतये। इत्यष्टभिश्चतुर्थावरणं। तद्दलाग्रेषुप्रागादि।
ब्राह्म्यादिभिरष्टभिः पंचमावरणं। भूपुरेइंद्रादिलोकपालैः तत्रैववज्राद्यायुधैः षष्ठमावरणं। अथार्द्धनारी
श्वरात्मकप्रासादपंचाक्षर्यआवरणं। अत्रापिमध्येत्रिकोणंतत्रसद्योजातादिभिनिवृत्यादिकलाभिश्च
गर्भावरणं। प्रथमं। षड्दलेषुषडंगैर्द्वितीयावरणं॥ अष्टदलपद्मस्यमूलेषुअनंतादिभिरष्टभिस्तृतीयावर
णं। तद्दलाग्रेषुउमादिभिरष्टभिस्तत्रैवेंद्रादिलोकपालैः पंचमावरणं। पुनस्तत्रैववज्राद्यायुधैःषष्ठमावरणं।
ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथावाराहीचतथेंद्राणीनारसिंहीचचंडिका। असितांगोरुरु
श्चंडःक्रोधउन्मत्तभैरवः। कपालीभीषणश्चैवसंहारश्चाष्टभैरवाः॥ एवमावरणदेवताः॥ गंधपुष्पाक्षतैः १२

संपूज्यमूलमंत्रपूर्वकंकृष्णागरुप्रमुखदशांगधूपंघृतकर्पूरवर्त्तिदीपंश्रीसदाशिवायसपरिवारायकल्पयामीतिसम
र्पयेत्॥ अथनैवेद्यार्थंपृथक्पात्रषट्कंसोपायेतच्चतुर्विधान्नंहोमार्थंपृथक्पात्रेपायसादिहविष्यान्नमानीयपुरतोनिक्षिप्य
अर्घोदकेनमूलमंत्रेणसंप्रोक्ष्यास्त्रेणसंरक्ष्यकवचेनावगुंठ्यधेनुमुद्रयामृतीकृत्यततोमूलमंत्रमुच्चार्यनैवेद्यंगृहाणस्वाहे
त्यमृतोपस्तरणमसीत्युदकंदत्वा॥ वाममहस्तेनग्रासमुद्रां॥ दक्षिणहस्तेनप्राणादिपंचमुद्राःदर्शयेत्॥ प्राणायस्वाहेतिप्रां
चप्राणाहुतीर्दत्वाअमृतमुद्रयापरिवारदेवतानांतर्पणंविभाव्यश्रीसदाशिवप्रीत्यर्थंहोमंकरिष्येइतिशिवानुज्ञयाहोमपात्रं
गृहीत्वादेवस्यपुरतोदक्षिणेवाहोमस्थानंसमासाद्यपूर्वाभिमुखउपविश्यगुर्वादीनभिवंद्यअस्त्रेणताडनत्रयंविधायमूले
नत्रिःप्राणानायम्य॥ अंगेषुहृदयादिषडंगानिविन्यस्यत्रिलिंगलेलिहनहनदहदहपचपचसर्वज्ञापयज्ञापयस्वाहा॥ अनेनमं
त्रेण अग्निंप्रज्वाल्यज्वालिनीमुद्रांदर्शयित्वावह्नौवह्निपीठंप्रकल्पयेत्॥ षट्कोणाष्टकोणचतुरस्रयंत्रंपरिकल्प्यअस्य
श्रीवैश्वानरमंत्रस्यभृगुऋषिः॥ गायत्रीछंदः॥ रमितिबीजं॥ स्वाहेतिशक्तिः॥ वैश्वानरावाहनेविनियोगः॥ वैश्वानर
जातवेदइहावहलोहिताक्षसर्वकर्माणिसाधयस्वाहा॥ अनेनमंत्रेणतत्रवह्निमावाह्यगंधादिभिःसंपूज्यच
वह्नौसदाशिवपीठयंत्रमपिकल्पयेत्तत्रसपरिवारंश्रीसदाशिवंध्यात्वापूजामूर्त्तेःसकाशाद्दीपांतरमिवश्रीसदाशिवमू

र्त्तिं निर्गमय्यमूलमंत्रपूर्वकं तत्रसंभाव्यावाहनादिमुद्रादर्शयित्वागंधादिभिसमभ्यर्च्यवह्निदेवतात्मैक्यंविभाव्यहोमं
कुर्यात्।आज्येनप्रणवव्याहृतीर्हुत्वा।आधारादिपीठदेवेभ्यःसकृत्सकृत्तत्तन्नाममंत्रैर्हुत्वापायसादिहविष्यान्नैराज्या
दि त्रिमधुप्लुतैर्मूलमंत्रेणजपदशांशसमसंख्याकावष्टोत्तरशतानाहुतीर्हुत्वासद्योजातादिपरिवारदेवताभ्यस्तत्तन्नाम्नैसकृ
त्सकृत्हुत्वापुनर्व्याहृतीर्हुनेत्।अथदेवायहोमंसमर्प्यमंडपस्येशानभागेदिव्यान्नपूर्णसाधारणपात्रंप्रतिष्ठाप्य
नीलांजननिभंखड्गपात्रंधरंक्षेत्रपालंध्यात्वा।क्षंक्षेत्रपालायनमइतिगंधादिभिःसंपूज्य।क्षांक्षींक्षूंक्षैंक्षौंक्षः
हुंस्थानक्षेत्रपालइमांपूजांबलिंगृहाणस्वाहा।।इत्युदकधारयादंडमुद्रयाबलिंदत्वापाणिपादौप्रक्षाल्यदेवं
पीठेसंभाव्यपूजास्थानंसमागत्यश्रीसदाशिवायमध्येपानीयमुत्तरापोशानंहस्तप्रक्षालनंदत्वा।श्रीखंडकरो
द्वर्तनंपरिकल्प्य।।नैवेद्यमुद्धृत्यस्थलंशुद्धिंविधाय।श्रीसदाशिवायपुनराचमनं।ताम्बूलंनानाफलानिपूज्य।
सांगुण्यार्थंयथाशक्तिदक्षिणांदत्वादीपवर्त्तिकैर्निराजयेत्।अथमूलेनपुष्पांजलिंदत्वाप्रदक्षिणन
मस्कारान्कृत्वावेदपुराणोक्तस्तोत्रैस्तुत्वाछत्रचामरवाहननृत्यगीतवाद्यैःसंतोष्यद्रव्यहीनंक्रियाहीनं

श्री

भक्तिहीनं सदाशिव। यत्पूजितो सि मया देव परिपूर्णं तदस्तु मे॥ इति प्रार्थ्य दूर्वासाक्षतपुष्पचुलुकोदकधारया
श्री सदाशिव श्रीपूजामिमां गृहाण स्वाहा इति पूजां समर्प्य। सपरिच्छदमात्मानं देवाय निवेद्य। दासोऽहमिति संभाव्य। स्व
भिष्टं प्रार्थयित्वा। विसर्जनमुद्रया देवस्य चालिनीं विभाव्य। पुनरपि मूलेन पुष्पांजुली दत्वा स्वात्मन्युद्वास्य षडंगविन्यस्य
ध्यात्वा गंधादिभिरात्मानमभ्यर्च्य मूलमंत्रं स्वयथाशक्ति जपित्वा शिवनाथोऽस्मि इति संभाव्य बलिं बहिर्विसृज्य तीर्थे
चोद्वास्य मण्डलस्थपुष्पमाघ्राय शिरसि निधाय इष्टान्यां निर्माल्यां नित्यक्तां कांचित्तस्थ ये ध्वत्वा सन्मुखो बलि
रागच्छेत्। यथाशक्ति शैवान् ब्राह्मणान् भोजयित्वा स्वयं भुंजीत॥ इति श्रीशिवपद्धतिसारमुक्तावल्यां पूजाविधिर्नाम
त्रितीयः श्रेणिः॥ नित्यविधिः समाप्तः॥ अथ नैमित्तिककाम्यविधिक्ष्याम्यशेषतः। विनियोगानुसारेण यथावच्छिव
भाषितं। यं यं योगं नियुंजीत कार्येषु विविधेषु च। विनियोगः स विज्ञेयो ऐहिकामुष्मिकार्थिदः। तत्संज्ञत्वानुसेवा
र्थं विनियोगं समारभेत्। अत्र नैमित्तिककाम्येन्यासध्यानार्चनादि च। नित्यविधिमुक्तमार्गेण कृत्वा कर्मानुसारतः॥
तत्तल्लिपिमभ्यास्थाय श्रेक्तस्थाने पुसंयमी। वक्ष्यमाणक्रियाने नजपहोमादिकं चरेत्। अथादौ नैमित्तिकविधि
रुच्यते। विघ्नालक्ष्मीपरिहारार्थं मूलेनैकादशावारमंत्रलिंगिभिः स्नानमात्। तथैवाष्टोत्तरशतस्नानेन सर्वतीर्थ

स्नानजंपुण्यंलभेत्। अयनद्वयविषुवेचंद्रसूर्यग्रहनादिभिर्दंत ऊर्ध्वेस्थित्वामोक्षपर्यंतंमूलमंत्रंजपेत्। पश्चा
द्देवसन्निधौ अयुतजपन्निर्मलोभवति। आर्द्रायुतचतुर्दश्यांशिवमभ्यर्च्याहोरात्रायोषितोभूत्वाशिवसन्निधौ
ब्रह्मकूर्चंसंस्थाप्यमूलमंत्रमष्टसहस्रंजपेत्। सप्तजन्मपापान्मुक्तोभवति। ९ यमेवक्तत्स्नाद्वाभ्यां॥ संध्योपासनविच्छेदे
मूलमंत्रमष्टोत्तरशतंजपेत्। इदंमलानाक्कृते। ज्ञानकृतेतुसहस्रजपः। स्तस्मान्मुक्तोभवति। पिंडाराहादिभिर्दुष्टसत्त्वैः
पतितादिभिर्निषिद्धजनैस्पृष्टंदुष्टमन्नंसूतकपतन्नालगणिकान्नंपर्युषितान्नंचभुक्त्वामूलमंत्रमष्टसहस्रंजपेत्
पश्चान्मूलमंत्रेणाभिमंत्रितंपंचगव्यंपिबेत्। शुद्धोभवति। रेतोमूत्रपुरीषापेयपानेत्यजस्त्रीनिषेवणेघृतान्नभुक्
प्राणामपूर्वकंमूलमंत्रमयुतजप ब्रह्मकूर्चंपीत्वापुनरपिपंचायुतंजपेत्॥ शुद्धोभवति। पक्षिघातनेशोतरवातं। गोव्य
निरिक्तकृत्यापदस्थानेआयुतं। स्त्रीशूद्रबालहननेत्र्ययुतं। क्षत्रियविट्गोवधेपंचायुतंमूलमंत्रंजप्त्वापश्चात्त्रिसंध्यं
गुरुदेवाग्निब्राह्मणानभ्यर्च्यप्राणायामपरोभूत्वायावत्तस्मात्पापान्मुक्तोभवति। ब्रह्महत्यादिमहापातकैर्मूलमंत्रंल
क्षंजप्त्वाविंशत्सहस्रप्राणायामान्कृत्वाशुद्धोभवति। किंचआर्द्राप्राणायामैर्विशुद्धोभूत्वोंकारमुच्चरन्नूजलंपिबेत्तुर्महा
पातकैर्विमुक्तोभवति। जितश्वासःसन्पंचलक्षंमूलमंत्रंजपेत्। पश्चान्मूलमंत्राभिमंत्रितंब्रह्मकूर्चंपिबेत्। पितृमातृसमु

तूलमस्थिमज्जासमागतंसंचितवर्त्तमानानामिज्ञानाज्ञानकृतंपापंसर्वंविनश्यन्ति॥अयुततिलहोमेनसर्वपापशुद्धि
भवति।इतिनैमित्तिकजपविधिःप्रायश्चित्तरूपेणोक्तः।अथकाम्यविधिरभिधीयते।माहानदीद्विलक्षंपूषार्वनागे
लक्षंवामूलमंत्रंजप्त्वाद्दूर्वांकुरतिलगुडूचीकाघुटिकाभिस्तद्दशांसंहोमंकृत्वातद्दशांशंतर्पणंब्राह्मणभोज
नंकुर्यात्।दीर्घायुर्भवति।ग्रामनिवासेस्वच्छवृक्षमाश्रित्यकरणांतंस्पृष्ट्वामूलमंत्रेणपालाशसमिधैरयुतंजुहुया
दुष्टातन्नांलिर्भवति।आदित्यादिमुखोभूत्वालक्षजपंकुर्यात्।तत्समाप्तिपर्यंतंप्रतिदिनमष्टोत्तरशतार्कसमिधै
मूलमंत्रेणहोमंकृत्वासूर्यमुपस्थापयेत्।सर्वव्याधिनाशनंभवति।सूर्यसंनिधौमासमेकंनित्यमष्टशतंमूल
मंत्रंजप्त्वोदकंपिबेत्।उदरव्याधिनाशनानाशोभवति॥गजतुरंगगवादीनांव्याधौशिवमभ्यर्च्यायुतमूलमंत्रंज
पेत्परिहारोभवति॥भोज्यपेयादिकंनित्यंमूलमंत्रेणैकादशवारमभिमंत्र्यभुंजीपात्।विषमप्यमृतंभवति
चंद्रसूर्यग्रहणेमोक्षावधिनदीजलेमूलमंत्रंजप्त्वापश्चादष्टोत्तरसहस्राभिमंत्रितब्राह्मीरसंपिबेत्।वागीशसमा
नवाग्भवति।अन्यच्च।आर्द्रायुतकृच्छ्रचतुर्दश्यांविषुवेअयनद्वयेग्रहणेउपोषितोभूत्वाभस्मनासर्वांग।

मुहूर्त्तम्। शिवमभ्यर्च्य तत्सन्निधौ पालाशपात्रे कपिलाज्येनोदकेन च मिश्रितं श्वेतवचाचूर्णं मूलमंत्रेणायुतवा
रमभिमंत्र्य पिबेत् सर्वज्ञो ब्रह्मवर्चस्वी भवति योगी। शारदायुक्तं रुसवागीश्वरीबीजं शिवमूलमंत्रस्याद्यंतयोः
संपुटं कृत्वा जपेत्। सद्यःप्रत्ययमेष्यति। तथैव लक्षत्रयं जपेत् सर्वशास्त्रार्थविद्भवति। तथैव पंचलक्षं जपेत्
गंगाप्रवाह इव वाग्भवति। तथैव नित्यमष्टोत्तरशतं द्वादशवारं जपेत् मेधावी भवति। बिल्वच्छायामाश्रित्य मू
लमंत्रमयुतं जप्त्वा तत्फलपुष्पमंत्रै रष्टोत्तरसहस्रं जुहुयात् लक्ष्मीपरिहारालक्ष्मीप्राप्तिर्भवति। अच्छिद्रैः
पालाशपुष्पैः शिवमंत्रेणायुतं जुहुयात् पुत्रप्राप्तिर्भवति। हिमवत्पर्वतशिखरे शिवमनुं चतुर्लक्षं जप्त्वा सर्ववर्ण
पुष्पैरयुतं हुनेत्। दिव्यौषधिदर्शनं भवति। पुनस्तत्रैव दशलक्षं जप्त्वा षण्मासं शिवमर्चयेत्। कुबेरसख्यं प्राप्य
वैमानिको भवति। प्रदोषे अरण्यस्थदुर्गामभ्यर्च्य शिवमनुं लक्षं जप्त्वा सर्वपुष्पैरयुतं हुनेत् साक्षाद्दुर्गां पश्यति।।
समुद्रगामिनीनद्यां कंठदघ्नजले स्थित्वा सूर्याभिमुखो शिवमनुं लक्षं जप्त्वार्कसमिधैरर्द्धलक्षं होमं कुर्यात्। सप
क्षात्सूर्यं पश्यन् दृष्टा तत आयुरारोग्यबलस्मृतिज्ञानानि लब्ध्वा सिद्धो भवति। मातृणामालये चतुर्लक्षं शिव १५

मनुं जप्त्वा चतुर्द्दश्यां गोचर्ममात्रं गोमयेन संलिप्य तत्र मंडपं कृत्वा वितानचामरध्वजपताकादिभिरलंकृत्य तत्र
सदाशिवमभ्यर्च्य वीरभद्रविघ्नेश्वरमातृकाणां च पूजनं कृत्वा। शिवमंत्रजपासुमेरयुतं हुनेत्। ततो वीरभद्रविघ्ने
श्वरमातृणां साक्षात्कारेणाजरामरत्वं चक्रवर्त्तित्वं लभेत्। शिवमूलमनुमयुतं जपेत् अष्टोत्तरसहस्रं हुनेत्।
नक्षत्रग्रहपीडापरिहारो भवति। तथैव वायुतं जप्त्वा घृतेनाष्टशतं हुनेत् दुःस्वप्नपरिहारो भवति पिप्पीलकसमिध्यै
र्मूलमंत्रेणाष्टोत्तरसहस्रं हुनेत् वैरिविद्वेषणं भवति। तथैव सर्षपतिलैर युतं जुहुयात् वैरिमारणं भवति। सैन्यमध्ये
बाणपुष्पैः सहस्रं हुनेत् सैन्यभंगो भवति। ध्वनिवर्जिते निवाते मध्यरात्रे शिवमनुमयुतं जपेत् नादसिद्धिर्भवति।
तथैव लक्षं जपेत्। शिवज्योतिबिंदुसियः सत्यं च लक्षं जपेत्। पंचेंद्रियजयो भवति।। ध्यानमुक्तः सन् पंचलक्षं
जपेत् पंचभूतजयो भवति। दशलक्षं जपेत् सर्वकामनासिद्धिर्भवति।। सर्वबीजैः संपुटं कृत्वा जपेत् सर्वार्थसि
धनं भवति। शाखादिसंपुटं कृत्वा दशलक्षं जपेत्। शिवसायुज्यं भवति। अथ नैमित्तिककाम्यहोम उच्यते।
विध्युक्तमार्गेण कुंडमंडपादिक्रियां विधाय देशिकेन सह स्वं प्राणानायम्यामुककामनार्थं कृतानां प्रपूर्णतासिद्ध्यर्थं
श्रीसदाशिवप्रीत्यर्थं उक्तद्रव्यैरेकसंख्याया होमं करिष्य इति संकल्प्य कुंडस्य संस्कारान् कुर्यात्। मूलमंत्रेण कुं

१६

उं वीक्ष्यास्त्रेण संप्रोक्ष्य तेनैव दर्भैः संमार्ज्य कवचेनाभ्युक्षेत्। अथ कुंडं दर्भमूलैः प्रागग्रा उदगग्राः तिस्रस्तिस्रो
रेखा लिखित्वा तत्र प्रागग्ररेखासु मुकुंदेशपुरंदरान् उदगग्ररेखासु ब्रह्मवैवस्वतेंदून् अभ्यर्च्य तन्मध्ये त्रि
कोण षट्कोणाष्टकोणवृत्तचतुरस्रं यं संलिख्य मूलेन सर्वान् अभ्युक्ष्य कुंडं पूजयेत्। तत्र कुंडमध्ये नीलेंदीवरस
मप्रभां ऋतुस्नातां वागीश्वरेण संयुक्तां वागीश्वरीं ध्यात्वा गंधाद्युपचारैः संपूजयेत्। सूर्यकांतादिसंभूतं
श्रोत्रियागारस्थं वाग्निं पात्रे पानीय क्रव्यादांशं परित्यज्य परेशिकश्चतुर्भिर्नमस्कारैः संकृत्य वामनाड्या प्राण
पूरणसमं मायाबीजेन संहारमुद्रया तमग्निमलं कृ समाकृष्य तत्तु मध्य बिंदुसंभा धिनाग्निजठराग्निनाचैकी
कृत्योद्भवमुद्रया मायाबीजेन पिंगलया रेचकेन ॐ रं वह्निचैतन्याय नमः इत्यनेन मंत्रेण बहिः स्थितायाग्नौ
चैतन्यं जनयेत्। ततो मूलेनाभिमंत्र्य धेनुमुद्रयामृतीकृत्यास्त्रेण संरक्ष्य कवचेनावगुंठ्य गंधादिभिरभ्यर्च्य कुं
डस्योपरि त्रिः परिभ्राम्य भूमिस्थजानुको मूलमंत्रपूर्वकं आत्मसंमुखं वह्निं शिवबीजधिया देव्या योनौ निक्षि
पेत्। पश्चाद्देवस्य देव्याश्च आचमनादिकं दत्वा। ॐ चित्पिंगल हन हन पच पच दह दह सर्वज्ञाज्ञापय स्वाहा
अनेन मंत्रेण ज्वालिनीं मुद्रां प्रदर्शयेत्। अग्निं प्रज्वालितं वंदे जातवेदो हुताशनं। सुवर्णवर्णमनलं समिद्धं विश्व १६

तोमुखं। अनेन मंत्रेण अग्निपूज्यस्वदेहे वह्निन्यासानुकुर्यात्। ॐ स्रूं पद्मरागाय अग्निजुह्वायै नमः। लिंगे। ॐ भ्रूं
सवर्णायै अग्निजिह्वायै पादयोः। ॐ भ्रूं भद्रलोहितायै अग्नि॰ शिरसि। ॐ ल्यूं लोहिताय अग्निजिह्वायै॰ वक्त्रे।
ॐ ल्यूं श्वेतायै अ॰ घ्राणे। ॐ व्यूं धूम्रिन्यै अग्निनेत्रयोः ॐ स्फूं करालिकायै। अग्निजिह्वायै नमः। व्यापकं इति तिसृ
न्यसः। ॐ सहस्रार्चिषे हृदयाय नमः। स्वस्तिपूर्णाय शिरसे स्वाहा। उत्तिष्ठपुरुषाय शिखायै वषट्। धूमव्यापिने कव
चाय हुं। सप्तजिह्वाय नेत्रत्रयाय वौषट्। धनुर्धराय अस्त्राय फट्। इति षडंगन्यासः। अग्नये जातवेदसे नमः मूर्ध्नि।
अग्नि सि सप्तजिह्वाय॰ दक्षिणांसे। अग्नये हव्यवाहनाय॰ दक्षपार्श्वे अग्नये अश्वोदराय॰ दक्षकट्यां। ॰ अग्नये
वैश्वानराय। लिंगे। अग्नये कुमारतेजसे वामकट्यां। अग्नये विश्वमुखाय वामपार्श्वे। अग्नये देवमुखाय शिरसि। इ
त्यष्टमूर्तिन्यासः। इष्टं शक्तिं स्वस्तिकाभीतिमुच्चैर्दीर्घैर्दोर्भिर्धारयंतं धारयेत्। जपाभं हेमाकल्पं पद्मसंस्थं त्रिनेत्रं
ध्यायेद्वह्निं बद्धमौलिं जटाभिः। इति वह्निं ध्यायेत्। अथोदकेस्य ऊर्ध्वमेखलायां परिक्षिप्य मध्यमेखलायां दर्भैः परि
स्तीर्य तत्लीयमेखलायां परिधीन् प्राचीवर्जं यथाक्रमं निक्षिप्य मेखलात्रयेषु ब्रह्मा विष्णु महेश्वरान् पूजयेत्। अस्य श्री
वैश्वानरमंत्रस्य भृगुऋषिः गायत्रीछंदः रमितिबीजं स्वाहेतिशक्तिः। अग्निप्रज्वलने विनियोगः। ॐ वैश्वानर जा।

तवेद इहावह्लो हिलाक्ष सर्वमिणिस्ताधयस्वाहा। इत्यादिमंत्रेण वन्हिगणादिभिरभ्यर्च्य यंत्रपूजां कुर्यात्
ॐ स्यूंपद्मरागायै अग्निजिह्वायै नमः। आग्नेय्यां। भ्यूंसुवर्णायै अं० नैरृत्यां। ऋ्यूंभद्ररोहितायै अं० वाय
व्ये। ऋ्लूंलोहितायै अं० ईशान्ये। ल्यूंश्वेतायै अं० पश्चिमे। स्यूंधूमिन्यै अं० पूर्वे। इति षड्दलेमूलेषु। मध्येक
रालिकरालिकायै अं० सहस्रार्चिषे नमः। आग्नेयां। स्वस्तिपूर्णाय नैरृते। उत्तिष्ठपुरुषाय। वायव्ये। धूमव्यापि
ने। ईशान्यै सप्तजिह्वाय। पुरतः धनुर्धराय। दिक्षु इति षड्दलाग्रेषु। अग्नये जातवेदसे नमः। आग्नेयां। अग्न
ये सप्तजिह्वाय दक्षिणे। अग्नये हव्यवाहनाय नैरृत्ये। अग्नये अश्वोदराय पश्चिमे। अग्नये वैश्वानराय वायव्ये
अग्नये कौमारतेजसे नमः उत्तरे। अग्नये विश्वमुखाय ईशान्ये। अग्नये देवमुखाय नमः पूर्वे इत्यष्टदलेषु। चतुरस्रे
पूर्वादिक्रमेण। इंद्राय। अग्नये। वरुणाय। वायवे। ईशानाय। इति पूजयेत्। पाणिभ्यां स्रुक्स्रुवावादाय
ग्निमुखे वह्नौ त्रिः प्रतप्य तदग्रमध्यमूलानि दर्भाग्रमध्यमूलैर्यथाक्रमं संमृज्य वामहस्ते निक्षिप्य दक्षिण
हस्तेन प्रोक्ष्य पुनः प्रतप्य दर्भानग्नौ विनिक्षिपेत्। आत्मनो दक्षिणे कुशास्तरणे स्रुक्स्रुवौ निधाय तदा
ज्यस्थालीमादाय अस्त्रेण संप्रोक्ष्य संप्रोक्ष्य तस्यामाज्यं विनिक्षिप्य मूलेन संवीक्ष्यास्त्रेण संप्रोक्ष्यास्त्रेण सं

मार्ज्यकवचेन। भुंस्ववायव्यांदंगारान्निरूह्य अत्रहृदयमंत्रेणस्थापयेत्। दर्भयुगलं अग्निनासंदीप्याज्ये
न क्षिप्त्वानले क्षिपेत्। इदं पवित्रीकरणं। पुनरपिप्रज्वलितदर्भयुग्मेन कवचेन निराज्य दर्भं वह्नौ निक्षिपेत्। इ
मभिद्योतनं। पुनरपिप्रज्वलितान् दर्भानास्त्रमंत्रेण घृते प्रदर्शयित्वाग्नौ निक्षिपेत्। इदमुद्योतनं। अंगारान्प्र
त्युह्य जलं स्पृष्ट्वा स्वपुरतो दर्भास्तरणे घृतस्थालीं स्थापयेत्। इति अंगुष्ठोपकनिष्ठाभ्यां दर्भौ धृत्वास्त्रेण
घृतस्योत्प्लवनं कुर्यात्। पुनरपि कुशाभ्यां हृदयमंत्रात्संमुखघृतस्य संप्लवनं कुर्यात्। इति घृतस्य संस्काराः
षट् कृत्वा आज्यप्रादेशमात्रौ द्वौ दर्भौ निक्षिप्य वामभागे इडा नाडी दक्षिणे पिंगला मध्ये सुषुम्ना ध्यात्वा स्रु
वेण दक्षिणभागादाज्यं गृहीत्वा अग्नये स्वाहेति अग्नेर्दक्षिणलोचने। वामभागे आज्येन सोमाय स्वाहा वामलो
चने मध्यादाज्येन अग्नये स्वाहेति भाललोचने जुहुयात्। पुनरपि स्रुवेण वामभागादाज्यं गृहीत्वा अग्नीषोमाभ्यां
स्वाहेति अग्निमुखे दक्षिणभागेनाग्नये स्विष्टकृते स्वाहेत्यग्निमुखे जुहुयात्। सर्वहृन्मंत्रस्मरणपूर्वकं कुर्यात्
प्रणवपूर्वकसकृद्ध्या हुतीं हुत्वा त्रिवारमग्निमंत्रेण घृताहुतीं कुर्नेत्॥ ततो वह्नेर्गर्भाधानादिविवाहान्त
पंचदशसंस्कारान्कुर्यात् तद्यथा प्राणानायम्य गर्भाधानं करिष्य इति संकल्प्य स्रुवेणाष्टाहुतीः कुर्नेत्। प्रति

कर्मस्वेष्टंकृत्वा। घृतप्लुतमूलाग्रान्पंचसमिधोजुहुयात्। अथजिह्वागमूर्त्तीनांक्रमादुक्तमंत्रैस्स्रुवेणाज्यंगृहीत्वा।
प्रत्येकमेकाकाहुतीर्हुनेत्। ॐ स्यूंपद्मरागायैस्वाहा। पद्मरागायैइदंनमम। अग्निजिह्वायै। अग्निजिह्वायइदं।
एवंसर्वत्र। भ्र्यूंसुवर्णायैअग्नि॰ भ्र्यूंभद्रलोहितायैअग्नि॰ भ्र्यूंलोहितायैअग्नि॰ स्म्र्यूंश्वेतायैअग्नि॰ भ्र्यूंधूमि
न्यैअग्नि॰ स्र्यूंकरालिकायैअग्नि॰ ॐ सहस्रार्चिषेस्वाहा। स्वस्तिपूर्णाय। उत्तिष्ठपुरुषाय॰ धूमव्यापिनेस
प्तजिह्वाय। धनुर्धरायअग्न्यंगदेवतायैइदंनममेतिसर्वत्र अग्नयेजातवेदसेस्वाहा। अग्निमूर्त्तयेइदंनममेति
सर्वत्रॐ॰ सप्तजिह्वाय। अग्न॰ हव्यवाहनाय॰ ॐ॰ अश्वोदराय॰। ॐ॰ वैश्वानराय। ॐ॰ कौमारतेजसे॰। ॐ॰ वि
श्वमुखाय। ॐ॰ देवमुखाय। अथसप्तजिह्वादेवता। अमर्त्येभ्यःस्वाहा। पितृभ्यः गंधर्वेभ्यः। यक्षेभ्यः। पिशा
चेभ्यः। राक्षसेभ्यः॰। अथस्रुवेणैवचतुर्भिराज्यंगृहीत्वा। ॐ वैश्वानरजातवेदइहावहलोहिताक्षसर्वकर्मा
णिसाधयस्वाहा। इत्यग्निमुखंविधायमूलेनप्राणानायम्यपूर्वोक्तसकलन्यासान्कृत्वाश्रीसदाशिवं
ध्यात्वावन्हौपीठार्चनंकुर्यात्। आधारशक्त्यैनमइत्यादि। एवंपूजितेपीठे। नीवीमार्गेणपत्रपुष्पसहितं।
श्रीसदाशिवमावाह्यावाहनादिमुद्राः प्रदर्श्यदेवतामूर्तेः षडंगविधायप्रधानमुद्रांदर्शयित्वा

पाद्याद्युपचारान्परिकल्प्य वन्हिदेवतात्मैक्यं भावयेत्। तद्यथा। मूलमंत्रेण पंचविंशतिघृताहुतीस्तन्मु
खे हुनेत्। तथा नाडीसंधानार्थं मूलमंत्रेणैकादशाज्याहुतीर्हुनेत्। ततो जपदशांशं यथोक्तद्रव्यैर्गुरूपदेश
मार्गेण हुनेत्। यत्र होमद्रव्यं नोक्तं तत्र घृतमेवेति द्रष्टव्यं। तत्रादौ आधारादिपीठदेवताभ्यः प्रत्येकमेकैकाहु
तीर्हुत्वा ततो मूलमंत्रेण प्रधानहोमं कृत्वा पश्चात्संयोजिताद्यंगावरणदेवताभ्यस्तत्तन्नाममंत्रैर्यथाशक्ति
र्जुहुयात्। स्विष्टकृतमाज्याहुतिं च हुत्वा वस्त्राभरणगंधपुष्पफलसहितं पूर्णाहुतिं हुत्वा घृतेन वसो
र्धारां कृत्वा। अथ गंधपुष्पाक्षतैर्वन्हिमभ्यर्च्य होमं देवाय समर्प्य नीचैर्भागे पादं वं पीठे संभाव्य गंधपुष्प
धूपदीपनैवेद्यादि। छत्राद्युपचारैः संपूज्य स्तोत्रैः स्तुत्वा प्रदक्षिणनमस्कारान् जपार्चनहोमादिकं देवाय निवे
दयेत्। अथ तर्पणं। पीठस्थितादेवतामूर्तिं पात्रांतरे निक्षिप्य मूलेन प्राणानायम्य पूर्वोक्तसंकल्पन्यासा
न्विधाय ध्यात्वा पूर्ववज्जलं संस्कृत्य यथोक्तद्रव्यैर्होमदशांशं तर्पयेत्। यत्र द्रव्यमनुक्तं तत्रोदकमेव
द्रष्टव्यं। आदौ आधारादिपीठदेवतास्ततः प्रधानदेवतां मूलमंत्रेण अंगावरणदेवतास्तत्तन्नाममंत्रेणाज

ङीनापात्रेणवादेवतामूर्ध्निनिर्पयेत्। तर्पणाद्वांसमार्जनंपुष्पैर्दीपैर्वाकुर्यात्॥पुनरपिदेवंपीठउपवि
श्य गंधादिभिरभ्यर्च्यक्षमस्वेतिक्षमाप्यसाष्टांगंप्रणम्यस्वाभिष्टमनोरथान्याचयेत्। त्वञ्चवर इवमहा
नंदसंदोहपुलकितो। निर्याणमुद्रयादेवमुपसंहृत्यमूलमंत्रपूर्वकंस्वात्मन्युद्वास्यस्वदेहषडंगंविधायध्या
त्वायथाशक्तिजपित्वाग्निविसर्जनंकृत्वाब्राह्मणभोजनंकुर्यात्॥ इतिपंचाक्षरमुक्तावल्यांनैमित्ति
कःकाम्य विधिर्नामचतुर्थस्त्रेणिः। नित्यनैमित्तिकेकाम्येयथाविध्युदितःक्रमात्। वक्ष्यंतेदेशकाल
दिनियमद्रव्यजातयः। तत्रादौमंत्रप्राप्तिर्हितुदीक्षाधीयते। मननात्त्रायतेइतिमंत्राः। दीयतेज्ञानंक्षीय
तेपापमितिदीक्षा। आदौसिद्धार्यादिभिर्मंत्रसिद्धिंविचारयेत्। अस्यषडक्षरस्यवैदिकमंत्रत्वान्नासिद्धा
रिर्विचारणीयः। शुभमासतिथिनक्षत्रयोगयुक्तशुभेदिवसेशिवालयसमुद्रनदीतीरपर्वताग्रगोष्ठे
दिशुभदेशेगृहेवावेदिकांकृत्वागोमयेनोपलिप्यसर्वतोभद्रंविलिख्यतत्रनवंकुंभंविधायतस्मिन्सर्वौ
षधिपंचपल्लवपंचरत्नपंचगव्यानिनिक्षिप्यशुद्धोदकेनापूर्यगंधाक्षतपुष्पवस्त्रैरलंकृत्यश्रीसदाशिव
मभ्यर्च्यमूलेनाष्टोत्तरशतंहुत्वादेशिकःस्ववेदिनायाःपश्चिमेसुस्नातमलंकृतंशिष्यंवेद्यामुपाग्निमुपवेश्य ११

पुण्याहंवाचइत्वामूलमंत्रेणालकलशोदकेनशालवारमभिषिंच्य दक्षिणहस्तं शिष्यस्यशिरसिनिधायदक्षि
णकर्णेत्रिवारंमंत्रमुपदिशेत्॥ सिद्धोस्त्वितिदेशिकः शिष्यशिरस्यक्षतान्दद्यात्॥ शिष्यस्तु देशिकमभिमत
पूजाभिः संतोष्ययथाशक्तिब्राह्मणान्भोजयेत्॥ ततोगुरोराज्ञयापुरश्चरणंकृत्वानित्यजापीभवेत्॥ पुरश्चर देव
विंशति पंचतुर्लक्षेर्जपः॥ नित्यमष्टोत्तरशतंजपः॥ एवंकृतेतस्यसिद्धिरचिरोंभवति॥ अथन्यः पक्षः सूर्यविं
दुग्रहे तीर्थेसिद्धक्षेत्रेशिवालयेसद्गुरूदर्शनेतत्कालएवमंत्रमात्रकथनंसव॥ दीक्षानत्रमासादिनिर्विचार
णीयं॥ इतिलघुदीक्षाविधिः अथदेशः गृहेसमफलं॥ गोष्ठपुण्यारण्यवनस्पत्यश्वत्थबि॥ ल्वच्छायानदी
समुद्रतीरगिरिगव्हरशिवालयेपुत्तरोत्तरसंख्ययादशगुणितफलंतत्रापिदोषवर्जिते॥ पश्चिमेमुखशिवाल
ये॥ तत्रापिमरुदेवसद्गुरुसूर्यइदीपजलगोविप्रसन्निधानपूर्वपूर्वश्रेयस्करं॥ अथकालः॥ आकर्षणेवसंतः॥ विद्वे
षणेग्रीष्मः॥ उच्चाटनेप्रावृट्॥ मारणेशिशिरः॥ शांतिकेशरत्॥ पौष्टिकेहेमंतः॥ तत्रापिविशेषः॥ हेमंतेपूर्वाह्णे॥ ग्री
ष्मेमध्यान्हे॥ प्रावृषिअपरान्हे॥ शेशिरेसायं॥ शरदईरात्रं॥ हिमंतेप्रत्युषं॥ जपयोग्यकालः॥ अथवारविशेषः॥
शांतिकेसोमवासरः॥ आकर्षणेभौमवारः॥ मारणेबुधवारः॥ शांतिकपौष्टिकेगुरुवारः॥ स्तंभनेमंदवारः॥ सर्व

कर्माणि भानुवारः। नक्षत्रविशेषः। आकर्षणोल्लिका। मारणे भरणी। स्तंभने ज्येष्ठा। उच्चाटने स्वाती।
द्वेषणेज्ञालतारा।। अथ जपस्थानं।। पूर्वादिषु दिक्षु अकादिस्वरान् युग्मयुग्मविलिख्य तथैव कादिपंचवर्गा
न् याद्यक्षरचतुष्टयं शाद्यक्षरचतुष्टयं लक्ष इत्यक्षरद्वयं क्रमेण लिखेत्। तत्र तत्स्थानाधिपास्याक्षरं यत्र प्र
भवति तत्कूर्ममुखं तत्समीपगौ द्वौ दिशौ कूर्मकरौ पार्श्वस्थौ द्वौ दिशौ कूर्मकुक्षी। तदनंतरदिशौ द्वौ कूर्मपादौ।
पृष्ठदिक्भागकूर्मपुच्छं इति कूर्मचक्रलक्षणं। मुखे सिद्धिः। करयोरल्पसिद्धिः। कुक्षौ रोगप्राप्तिः। पादयो
र्हानिः। पुच्छे निधनं। एवं ज्ञात्वा मुख१ वजपस्थानं। तत्रावकाशो यदि न स्यात्। तदा तु नदीपं वा नियुज्यत
त्सुखउपविशेत्। अथ दिङ्नियमः। सर्वत्र प्राङ्मुखो उदङ्मुखो भिक्षदेवता मुख इति नियमः। अथ विशेषः।
स्तंभने पूर्वमुखः। विद्वेषणे अग्निमुखः। मारणे दक्षिणमुखः। मोहने नैर्ऋतिमुखः। शांतिक वश्य पश्चिमामुखः।
उच्चाटने वायव्यमुखः। धनार्थे उत्तरामुखः। अथासनानी। ज्ञानार्थे कृष्णाजिनं। मोक्षार्थे व्याघ्राजिनं। पापक्ष
यार्थे कुशामयं। कीर्तिकाम श्वेतवस्त्रं। अभिचारे नीलं वा। धिनाशने कंबलं। सर्वार्थे चित्रकंबलं। अथास
णि॰१ नानि। वामोरौ दक्षिणपादं विन्यसेत् दक्षिणोरौ वामपादं विन्यसेत्। इदं वीरासनं। वामजानु वीरं तरदक्षि २०

पापादतलं विन्यसेद् दक्षिणजान्वोर्वीनं तरे वामपादतले विन्यसेत् इति स्वस्तिकासनं। अथवा वामपार्श्वे द
क्षिणगुल्फं विन्यस्य सव्यपार्श्वे वामगुल्फं निदध्यादिदं स्वस्तिकासनं। वामोरुणि दक्षिणपादं विन्यस्य दक्षिणो
रुणि वामपादं विन्यस्य दक्षिणहस्तेन दक्षिणांगुष्ठं वामहस्तेन वामांगुष्ठं बिभृयादिदं पद्मासनं। अथ जप
माला। अंगुलि भिर्जपे समानफलं। अंगुली रेखाभिर्जपे अष्टगुणं फलं। गणनाप्रकारः। सर्वांगुलीर्निरंध्र
संलग्नं किंचित्कुब्जं कृत्वा हृदये निधाय मध्यमानामिकामध्यपर्वद्वयं प्राक् दक्षिणेनानामिका मूलपर्वमारभ्य
मध्यमामूलपर्वपर्यंतं अंगुष्ठाग्रेणावर्तयेत्। एवं मनुलोमप्रतिलोमरूपेण गणनां कुर्यात्। पुत्रजीवमणिभिर्ग
णिते दशगुणं फलं पुत्रधनधान्यप्राप्तिश्च भवति। शंखशुक्तिभिर्दशगुणं। श्री प्रा लिश्च प्रवालैः सहस्रगुणं
लोकवश्यफलं च। स्फाटिकैरयुतगुणं। मोक्षाश्च मौक्तिकैर्लक्षगुणं सौभाग्यप्राप्तिश्च। पद्माक्षैर्दशलक्षगुणं ल
क्ष्मीप्राप्तिश्च। रौप्यसौवर्णैः कोटिगुणं। सर्वार्थसिद्धिश्च। कुशग्रंथिभिः शतकोटिगुणं पापक्षयश्च। रुद्राक्षैर
नंतगुणं भुक्तिमुक्तिप्राप्तिश्च। अथ मालानिर्माणविधिः। अजीर्णान् शीर्णान् नवान् समान् मणीनानीय सद्योजात
मिति मंत्रेण पंचगव्यजलैः संक्षाल्य वामदेव इति गंधाक्षतपुष्पैरभ्यर्च्य अघोरेभ्य इति धूपदीपेन तत्पुरुषायेति

नैव्यद्यं परिकल्प्य। ईशानेऽतिशत्यकं शतं शतमभिमंत्र्य पुनं पंचभिमेरुर भिमंत्र्य द्विजेनु पुण्य स्त्रियानिर्मितं त्रि
थिवर्जितं नवं शुभ्रं सूत्रं त्रिवृत्तकृत्वा संसालयमुखंमुखेन पृष्ठं पृष्ठेन संयोज्य ग्रंथयेत्॥ मेरुमुपरियोजयेत्। अंतरमूले
नयथासंख्यं कृत्वा मालिकां सुखेनिवेद्य नस्मा गृहीत्वा तया मालिकां जपाभ्यासानं जपं कुर्यात्॥ येन मंत्रेण संस्कारं
करोति तं मंत्रं जपेत्। तया मालिकया अन्यं मंत्रं न जपेत्। दक्षिण हस्ते गृहीत्वा हृदि संस्थाय वाससा पिधाय सावधानतया
जपेत्। वामहस्तेन स्पृशेत्। न च करभ्रष्टं कुर्यात्। जपांते कृत्वा गोपयेत्। नष्टे जीर्णे त्रुटिते पुनः संस्कारपूर्वकं यो
जयेत्। अथांगुली नियमः। मोक्षार्थी अंगुष्ठेऽक्षमालां निक्षिप्य मध्यमया त्वाचालयेत्। भुक्तिमुक्तिकामस्तु मध्य
मायां निक्षिप्यांगुष्ठेन चालयेत्। शत्रुनाशाने तर्जन्यां स्थापयेत्। शांतिकर्मण्यनामिकायां। आकर्षणे कनिष्ठिका
यां संस्थापयेत्। अथाक्षसंख्या। अष्टोत्तरशतं। चतुःपंचाशत्सर्वकामदं। मोक्षार्थि पंचविंशतिः। पौष्टिके सप्तविं
शतिः। धनार्थे त्रिंशत्। आभिचारे पंचदश। अथ जपलक्षणं। अक्षराणां मनसैवोच्चारणं। मानसं सर्वाभिष्ट
प्रदं। किंचित्स्वस्यैव श्रवणगोचरोच्चारणं उपांशुः स्वपरश्रुतिप्रदः। स्पष्टशब्दोच्चारितवाचिकः। स्त्रवैरिमारकः।
सर्वत्र मंत्रार्थचिंतनपूर्वकं जपं कुर्यात्। अथ जपनियमः। पीठपादः कंचुकी शिरस्त्र शिरः। गल्लावृतो मुक्तके

शोनग्नोहसन् । चान्यंपश्यन्भ्रमंश्च । स्वपन् । नजपेत् । क्षुत् निष्ठिवन विजृंभण कंडुयन व्यालापांश्च वर्जयेत् । यदि
प्रदिप्रमादं भवति । तदाचम्य दक्षिणकर्णमुपस्पृश्य प्रधानदेवतांस्मरेत् । अनासनः शयनो गच्छन् उच्छिष्टः रथ्यामं
धकारे प्रसारितपादः कुक्कुटासनो वह्लिर्गितिनुर्यानस्तढो नजपेत् । यदिकार्यवशयात् । स्खलनं भवती । तदाचम्य
प्राणानायम्य भूशुध्यादिन्यासजालानथवा षडंगवा कृत्वा जपेत् । अथपुरश्चरणनियमः । पुण्यक्षेत्रे जपस्थानं व्रत
नियमं च विधाय तत्र युगधर्मेण प्राक्संख्याय । चतुर्गुणं जपं कुर्यात् । अत्यहं जपांते पुरश्चरणांते वा तद्दशांशं होमः । त्रि
त्यं त्रिषवणस्नानं पंचगव्यनामलकेन गात्रोद्वर्तनं कुर्यात् । जपान्ते तिलोमतर्पण ब्राह्मणभोजनमिति पंचांगोपासनं
नित्यत्वेन कृत्वा । पश्चात्पुरश्चरणांगं जपं कुर्यात् । लवणक्षारमाम्लं गृंजनपलांडु आदि निषिद्धानि । तथास्रोद्रतां
बुल कांश्यभोजनखद्वाशयन स्त्रीनिवषणभाल्यधारण गीतवाद्यश्रवणं दिवास्वापं भ्यंगरथ्यासर्पण परापवादी
नि वर्जयेत् । गर्भाधानादिसंस्कारान्मृताद्धादिक्रियान्नशूद्रादि निषिद्धापर्युषितादिस्वभावदुष्टान्नकेशकीटादि
संसर्गदुष्टान्नश्वादिस्पृष्टान्नानि च मनसापि नेच्छेत् । क्षीरफलमूलशाकहविष्यभिक्षाहारो भवेत् । तत्र पूर्वं पु
त्रेयान् । तदपि हितमितमेव मेव भुंजीयात् । भूमिशायी ब्रह्मचारी मौनी देवतापरायणो भूत्वा । यथासंख्यं जपं

२२

ते होमतर्पणब्राह्मणभोजनादि कुर्यात्॥ अथ पूजाद्रव्याणि यमादयः। अश्वग्नौ हृदये सूर्यस्थंडिले प्रतिमासु स्वा
भिष्टदेवतापूजां कुर्यात्। तत्र प्रतिमा द्विविधा स्थावरजंगमा चेति। स्थावरा चेति द्विधा। स्वयंभू कृत्रिमा चेति।
यत्र यत्र भक्तानुग्रहणार्थं स्वयमेव देवताविग्रहाविर्भवस्ते स्वयंभवः॥ यत्र यत्र पुण्यक्षेत्रेषु देवसिद्धर्षिमनुष्यनिर्मितास्ते
कृत्रिमः॥ जंगमापि द्विविधः। स्वयंभूः कृत्रिमा चेति। क्षेत्रगंडक्यादितीर्थप्रभावात्स्वयमेव देवताविग्रहः स्वरूपप्रभव
तितः। स्वयंभुवः। शिल्पशास्त्रैर्यैर्यथास्वरूपप्रमाणतो निर्मिता कृत्रिमाः धातुशिलादारुमृल्लेखनादिभिर्नानावि
विधः। अथ जंगमप्रतिमानां लक्षणमुच्यते। तत्र स्वयंभुलक्षणं गंडकीनद्यां सोमेश्वरक्षेत्रे शिवनाभाख्यः शिलाभ
वंति तल्लक्षणमुच्यते। अस्य कपिलवर्णः पार्श्वे वामवर्णः उपरि उन्मत्तमहिषनेत्रचतुष्कं तत्र सदाशिवस्य प्राक्य
च्यसान्निध्यं सर्वापेक्षयोत्कृष्टं वेदितव्यं। नर्मदायां बाणतीर्थे बाणलिंगाख्याः शिला भवंति। तल्लक्षणं पार्श्वे बाण
रेखांकितश्चेत्तवर्णो वा लिंगाकृतिः। तत्र सदाशिवस्य सान्निध्यं उत्कृष्टं वेदितव्यं। अथ कृत्रिमप्रतिमालक्षणं।
लेख्यालेप्याधातुमयी ति त्रिधा यत्र मंत्राक्षर चित्रात्मक लेख्या मृन्मया लेप्या। सुवर्णादिधातुविकारा धातुमयी
तत्र करचरणाद्यवयुक्तप्रतिमापेक्षया लिंगरूपप्रतिमैव शिवपूजार्थमुत्कृष्टा। तथाहि। सुवर्णलिंगं सोभा २२

ग्यप्रदं। राजतं यशोवर्द्धनं। ताम्रं यन्नास्करं पारदं सर्वसिद्धिदं। सैकतं भूरिगुणदं। काश्मीरं श्रीकरं। नवरत्नमयं स्फाटिकं
मारकतं पार्थिवं। सर्वार्थप्रदं। लवणोत्थं मासुरकरं। तिलपिष्टोत्थं श्यामदं। तुषोत्थं मारणाकरं। पिष्टोत्थं स्तंभनकरं। तंडु
लपिष्टजं सारस्वतप्रदं। दधिदुग्धनवनीतोत्थं कीर्तिसौभाग्यसुखप्रदं। धान्यजं धान्यदं। फलजं फलदं। पुष्पजं पुष्पदं। दे
कशास्थिसंभवं। शत्रुनाशकं। वंशांकुरोत्थं वंशवर्द्धनं। गोमयोत्थं रोगहरं। दूर्वागुडूचीसंभवं अपमृत्युनाशकं। पू
मुच्चाटनकरं। १ तेषां प्रमाणं। लिंगमानं समं पीठदीर्घविस्तारसंयुतं। तदर्द्धं गोमुखाकारं तदर्द्धं लिंगमुच्यते। इदं पंचसूत्रे।
अथ पूजाप्रकारः। जले पुष्पे रग्नौ हृदि बिंबे। हृदये ध्यानेन सूर्ये जपेन स्थंडिले भावनया। प्रतिमायां नानोपचारैः पूजां
कुर्यात्। उपचाराः पंचषोडशद्वात्रिंशत्। गंधपुष्पधूपदीपनैवेद्यानीति पंचोपचाराः। आवाहनासनपाद्यार्घ्याचमन
स्नानवस्त्रयज्ञोपवीतगंधपुष्पधूपदीपनैवेद्यप्रदक्षिणनमस्कारानीति षोडशोपचाराः। आवाहनासनपाद्यार्घ्या
चमनमधुपर्कवस्त्रोपवीताभरणगंधाक्षतपुष्पधूपदीपनैवेद्यतांबूलदक्षिणाफलनीराजनमंत्रपुष्पप्रदक्षिण
नमस्कारस्तोत्रछत्रचामरवाहननृत्यगीतवाद्यप्रार्थनाविसर्जनानीति द्वात्रिंशदुपचाराः। स्थावरप्रतिमायामाव
हनं कुर्यात्। तत्र परमेश्वरस्य स्वतः सान्निध्यं जंगमप्रतिमायामावाहनं विकल्पः। शिवनाभौ बाणलिंगे वावाहनं

नकुर्यात्। तत्रापिपरमेश्वरस्यनित्यसान्निध्यं। सुवर्णादिलिंगेष्वावाहनमवश्यंकुर्यात्। तत्रसांगं। सपरिवारं।
सवाकिमिति। ससायुधप्रधानदेवतावाहनेनैवांगावरणावाहनं। ज्ञायतेतेषांपृथगावाहनंनास्ति। वाहनारूढमाचा
द्यवाहनादेवतार्यकरावलंबंहेमासनेनूपवेशयेत्॥ नूचरत्नचित्रतदुकूलादिवस्त्रमासनार्थंकल्पयेत्। चर्मपा
त्रपोस्थकायसमास्त्रुनैव हेमराजिततात्राणामन्यतमंपाद्यार्थेपृथक्कुर्वन्तुलिं। अर्घ्यार्थेअंजलीसमंगो।
मुखाकार। आत्ममयोर्यगोकर्णाकृति। पात्रंकुर्यात्। तेषांद्रव्यं। पद्मविष्णुपर्णीदूर्वाश्यामकं। चत्वारिपाद्यद्र
व्याणि। गंधाक्षतपुष्पकुशतिलसर्षपयवदूर्वाइत्यष्टद्रव्याणि। जातिलवंगैकंकोलमाचमनंद्रव्याणि। हेमरा
जकांस्यमयंमधुपर्कपात्रंतत्रमधुदधिसुवर्णादिकलशास्नानोदकपात्र। स्वयंशिष्योवाप्सुविभूत्वाजलकसमीप
गत्वाजलदेवतानमस्कृत्यगंगेत्यास्तूर्यांतीर्थमाकृष्यतत्रसंभाव्यमूलेनाभिमंत्र्यवस्त्रपूतंजलंकुंभेदूर्वादक्षिण
हस्तेनदक्षिणकुक्षौवानिक्षिप्याहरेत्। शिरसास्कंधेन। वामहस्तेनवाहनायत्। पर्युषितंक्षारंदुर्गंधि
फेनबुद्बुदयुक्तंशूद्राहृतंक्रयक्रीतंजलंवर्जयेत्। भागीरथीजलस्यपर्युषितत्वंनास्ति। गव्यक्षीरदधिघृतमधु
शर्कराःपंचामृतानि। नानासुगंधैर्वासितोगंधोदकः। कुशपुष्पोकुशोदकः। हिमसारपुष्पोदकः। कर्णाटकमा

षयापन्नीरइतिवदंति। नारिकेलरसान्नेक्षुरसाः। फलोदकः। रत्नयुक्तोरत्नोदकः। यद्यपिशंखोदस्यापि शि
वार्चने निषेधस्तथापिब्रह्मोत्तरखंडे शिवाभिषेके विहितत्वात्। शंखवर्जितं सुवर्णादिधारापात्रेणैवाभि
षेकंकुर्यात्। अभ्यंगद्रव्यपुष्पवासिततैलंगव्यघृतलिखतैलंवा। उद्वर्तनार्थंशालिपिष्टंसुगंधयुक्तरजनि
पिष्टंवा। तैलापकर्षार्थंशिलाचूर्णंशर्करानिंबूरसा॥ स्नानार्थमुष्णोदकं। पात्रांतरेणासिंचेत्। करोग्रेरुदकं
नसिंचेत्। अंगुलीभिर्नमर्दयेत्। नखैरपि। किंभरणं। वस्त्रोपवीताभरणानांनिर्माल्यत्वंनास्ति किंतुरत्नस्वर्ण
मयानांहस्तेननिर्मलीकरणं। पट्टवस्त्राणांजलैःप्रोक्षणं। चैलवस्त्राणांजलैःक्षालनं। कृत्वाप्रत्यहंसमर्पयेत्। चं
दनागरुकर्पूरापत्रकुंकुमकेशरं। रक्तचंदनंकोष्टंभद्रमुस्ताइतिशैवाष्टगंधं। तथैवबिल्वचंदनमपि। शिवप्रीति
करं। शुभ्रअखंडिताधौताः। शालितंडुलाः। श्वेततिलयुक्ताशिवप्रीतिकराः। अथपुष्पाणि। परंअपरंउत्तमंमध्य
मंअधममितिपंचविधपुष्पाणिमणिरत्नसुवर्णादिनिर्मितानिपरं। चित्रवस्त्रनिर्मितंअपरं। वृक्षजंउत्तमं। फल
रूपंमध्यमं। पत्ररूपंमध्यमं। पराणांमपराणांनिर्माल्यत्वंपर्युषितत्वंनास्ति। समार्जनप्रोक्षणशुद्धिः कमलानिशत
पत्रं। उत्पलंकुमुदं। धत्तूरं। एतानिश्वेतानिरक्तानि। नीलान्यपिशिवप्रीतिकराणि। शावतिकामल्लिकाअगस्त्य

रविर १तानिश्वेतानि।२ रक्तान्यपिशिवार्हाणि।जातिपाटलपुंन्नागकुंदकांचनकेसरप्रवालवकुलकल्हारमालतीकंदंब
तिलकंदिकागोवर्त्तन्निकर्पद्रोणबृहतीमदार्करसलसुख्यानिपुष्पाणिशिवप्रीतिकराणि।चंपककेतकीजपापुष्पा
णिवर्जयेत्।शिरिषत्वात्ममूलीशिग्रुकोशातकी१रंडकोविदारचितामूत्रपुरिषोद्भवानिउग्रगंधनिर्गंधमुक्तकेशाका
शादिदूषितंपर्युषितपुष्पाणिचवर्जयेत्।करविरकुरवकानिपाटलावोनिबंधिशुद्धानि।तद्धूर्ध्वंपर्युषितानिभवंति।
तथेवजातिपुष्पंमुहूर्त्तं।पुन्नागकुटजानियाममात्रं।नारंगंमल्लिकामरुदर्हयं।चंपकमहोरात्रं।शतपत्रद्विरात्रं।उत्पलं
त्रिरात्रं।बकुलंकेतकीपंचरात्रं।अथफलानि।नारिकेलाम्रपनसकदलीखर्जूरनारंग।मातुलिंग।दाडिंबबदरी
द्राक्षांजंबीरेक्षुमुख्यानिशिवयोग्यानिफलानि।अथपत्राणि।बिल्वतुलसीदूर्वापामार्गशमीमात्रिदमनिकागस्त्य
मुख्यानि।पत्राणिशिवार्हाणि।बिल्वतुलसीदूर्वाणांपर्युषितत्वंनिर्माल्यत्वंनास्ति।प्रक्षाल्यपुनरर्पयेत्।१तानि
पुष्पफलपत्राणिस्वयंरोपितरक्षजानिमहोत्कृष्टानि।अस्वामिकवनानितानिमध्यमानिभ्रष्टेह्रितानिअमानियाचनया
चौर्येणानितानिअधमानिव्यर्थानि।१तेषामुद्धारणविधिः।पाणिपादौप्रक्षाल्याचम्यप्रांजलिर्वृक्षाभिमुखो
भूत्वा ॐ नमइतिवनदेवताप्रणाम्यतस्यैपुष्पमेकंव्योम्नेपुष्पमेकंपृथिव्यैपुष्पमेकंदत्वा।पूर्वाभिमुखोविकाशा २४

तु

शिलानिमुकुलानिसंचिनुयात्।वृक्षोपरिविकासिनिभ्यः पतितानिकोमलमुकुलानिचवर्जयेत्।१ रंडपत्रैर्नवि
भिन्नपात्।कदल्यादिसुद्धपत्रेषुसंस्थाप्यजलैःसंक्षाल्यहस्तेनार्पूर्नीसात्।अथावरणपूजाविधिः।पूज्यपूजकयोर्मध्य
देशः१वपूर्वदिक्कूनतुसूर्योयेदियस्थानं।।पूज्यस्यदेवस्यमुखंयस्मिन्दिशाकल्पितैसैवादिकुप्राचीदारम्यअंगावर्णा २१
दिकंकल्पयेत्।पञ्चायतनेमध्येप्रधानभूतःसदाशिवः।तैसैशान्यांहरिः।आग्नेयिसूर्यःनैर्ऋत्यगणेशः।
वायव्यांदेवी।पुजाक्रमस्तुआदौप्रधानदेवतां।ततोगणेशंदाबीहरीसूर्यं१वंपूजयेत्।दशांगं।कस्तूगरूउशिरं।
चंदनं।गुग्गुलः।मधु।शर्करा।आज्यंवाधूमरहितांगारेषुनिक्षिप्यव्यजनेननीचैर्वीजियेत्।जयजयेतिस्तोत्रंकुर्व
न्मंगलवाद्यंवादयेत्।गोघृतांक्तेकर्पूरयुक्तवर्त्तित्रयं।वह्निप्रज्वलितदीपंमुख्येनीराजयेत्।तत्रापिस्तोत्रवाद्यघोष
मपिकुर्यात्।नैवेद्यं।लेह्यंपेयंचोष्यंखाद्यंइतिचतुर्विधं।लवमधुराम्लकटुक्षारकषायतिक्तइतिषड्रसाः।सप्तमोलव
णरसः१तेषांप्रत्येकंमेलनात्।नानाविधविचित्ररसाभवंति।तेषांपाकस्तुपंचधा।आपपाकः।अंगारपाकः।भ्राष्ट
पाकः।तैलपाकः।तप्तरसकः।अन्नंपायसंसूपःशाकोमक्षकथिका।लवणाद्याकइतिसप्तप्रकारः।अथतेषांप्रत्येकंभे
दाः।शाल्यन्नं।कसरान्नं।क्षीरान्नं।दध्यन्नं।गुडान्नं।तिलपिष्टान्नं।मुद्गान्नं।घृतान्नमित्यन्नभेदाः।मुद्गादि

२५ द्विदलधान्यैःकृतःसूपः। पयसाकृतंसंयववादिनानाविधपायसं। शालिहूपत्ररूपंबहुविधःशाकः। अपूपवटकलड्डुक
धारिका। शष्कुलीपूरिका। मंडकादीनिभक्ष्याणि। लकामलकलिंबिणीकपित्थाम्रबदरीमुख्यंम्लद्रव्यकृताः। कथिका।
नैवेद्यपात्रंस्वर्णरौप्यकांस्यमयंपद्मिनीविकरेष्णपालाशकदलीब्रह्ममुंजध्वाम्रयंवा। मृन्मयताम्रमयभिन्नपात्रं।
पालोदुंदारुमयपल्लवेकरवस्त्रेषुमोन्वर्जयेत्। मध्यपानार्थंस्वर्णादिकमंडलुंहस्तकपूर्णंहस्तप्रक्षालनार्थंमुखोदकं
करोद्वर्तनार्थंश्रीखंडं। पर्णानिसप्तसंख्यानि। कर्पूरवासितानिक्रमुकानिविषमानि। मुक्ताचूर्णं। एलालवंगानि
नागर। खदिरः। एतेसमायुक्तंताम्बूलं। फलानि। नानाविधानि। पूजासाद्गुण्यार्थंयथाशक्तिदक्षिणा। नानाविधार्ति
के नीराजनं। वाद्यघोषसहितंकुर्यात्। वृषंचैववृषंचैवसोमसूत्रंपुनर्वृष। चंडंचसोमसूत्रंचपुनश्चंडंपुनर्वृषं। नम
स्कुर्वन्प्रदक्षिणंकुर्यात्। त्रयमावश्यंनलोपयाशाति। एकंप्रदक्षिणंनकुर्यात्। उरसाशिरसादृष्ट्यामनसाश्रद्ध
यापिच। पद्भ्यांकराभ्यांकर्णाभ्यांप्रणामोष्टांगमुच्यते। एकप्रणामंएकहस्तप्रणामंनकुर्यात्। स्वर्णरौप्यपट्टवस्त्रा
दिनिर्मितंशातशानिभंछत्रं। दीर्घदंडोवृषांकितोध्वजः। ह्रस्वदंडवृषांकितलंबाछिन्नापताका। चमरीवालसमूहोस्य २५
पर्दिंडश्चामरः। मनुष्यवाह्यस्वर्णरौप्यगजदंतनिर्मितंचतुरस्रंयानं। हस्त्यश्वरथांदोलनं। पादचतुष्टयगात्रचतुष्ट

यशुक्तदीर्घंचतुरस्रं मृदुतूलोपधानास्तरणमंडितं। स्तंभचतुष्टयोपरि विलतवितानं। मंचकं। तदेकचतुष्कोणबद्धश्वं
पा१२ खलंबद्धमानाडोलं। मणिमयंकाव्ययमयंवामकुरं। नानाकलशसहितपादस्वालनंनरसं। द्वात्रिंशद्रागबंधकोलापोगी
तं। हस्ततालइतिपंचवाद्यं। घटावाद्यमेवसर्ववाद्यात्मकं। ततोविसर्जनं। स्थावरोत्रिविनाभोबाणलिंगेचवि
सर्जनंनास्ति। अन्यत्रकुर्यात्। बाणलिंगेरत्नलिंगेरसलिंगेस्फटिकलिंगेस्वायंभुवेचेडीश्वेरा विकारोनास्ति। अत्र
निर्माल्यग्रहणंकुर्यात्। इतिपूजाप्रकारःसमाप्तः। अथहोमविधिः। कोटिहोमेऽष्टहस्तकुंडं। अर्धकोटौसप्तहस्तकुंडं।
दशलक्षेषष्ठ। पंचलक्षेपंच। एकलक्षेचतुर्हस्तं। अर्द्धलक्षत्रिः। अयुतेद्विहस्तं। सहस्रे१कहस्तं। शतेअरत्निः। शतार्द्धेमुष्टि
मानंकुंडंकुर्यात्। काम्यतोपरत्वेनकुंडविधिः। स्तंभनेपूर्वमुखमष्टदलकुंडंकुर्यात्। मारणेआग्नेयत्रिकोणं। विद्वेषणेदक्षि
णेपद्मदलं। वश्येनैर्ऋत्येवर्तुलं। शांतिकेपश्चिमेचतुरस्रं। उच्चाटनेवायव्येसप्तदलं। लक्ष्मीकामेउत्तरेपद्मकं। शुभ
कार्येईशान्ये। एवंकुंडविधिः। आकर्षणेअर्द्धचंद्राकारं। मोहनेद्वादशारं। योगनाशने१कादशारं। राज्यप्राप्तौपंच
रं। सौभाग्यकामेचतुष्पत्रं। संग्रामेधनुराकृतिः। निर्वैरेद्विदलं। सर्वकार्येचतुरस्रं। वर्णानुरूपेणकुंडानि। चतुरस्र
ब्राह्मणस्य। वर्तुलंक्षत्रियस्य। अर्द्धचंद्राकारंवैश्यस्य। त्र्यस्रंशूद्रस्य। सर्वेषांचतुरस्रंवा। अथस्थंडिलविधिः।

समिद्धोमे स्थितं। आज्यहोमे शयनं। शेषेषु निषण्णं वन्हिं ध्यायेत्। सधूमाग्निः कर्णं तत्र कृतं चेत्। कर्तव्याधिप्राप्तिः॥
इंधज्वाला नासिका तत्र जेतं चन्मनः पीडा। सधूमज्वाला नेत्रं। तत्र कृतं चेदंधत्वं। केवलांगारा मस्तकं तत्र कृतं चेन्मनस्व
यी। धूमरहितप्रकर्षज्वाला मुखं तत्र कृतं चेदभिष्टसिद्धिः। अथ यंत्रिचार्याश्च कृते तनो यथावकाशाः। गंधपुष्पादिकम
ग्नेर्बहिर्दातव्यं। वामहस्तं स्वहृदि निधाय दक्षिणहस्तेन होतव्यं तत्र मुद्रास्तिस्रः। मृगी हंसी सूकरीति॥ संकुचितांगु
ल्यग्रसंलग्नकरी सा भिचारे प्रयोक्तव्या। कनिष्ठिकामुक्तावासंकुचितांगुलिभिस्तुष्ट्या हंसी। सा पौष्टिके। कनिष्ठातर्जनीमु
क्तासंकुचितांगुलित्रयान्मृगी सा शांतिककर्मणि प्रयोक्तव्या। स्वाहाकारेण सहैव स्वाहांतेवाहूदेनव भवेतित्यागांतेवा
हुतिप्रक्षेप्तव्या। अथाहुते द्रव्यमानं। घृतं कर्षमात्रं। दुग्धं शुक्तिमात्रं। मधुशुक्तिमात्रं। कर्षाद्भिः स्रुक्स्रुवः। प्रत्येकं ठक्कंकं भव
ति। दधि प्रसृतिमात्रं। लाजपृथक्सक्तुव्रीहिमुद्गमाषयवगोधूमाः मुष्टिमात्रं। व्रीहिर्यवैर्वोतं शालिर्वा। तंदुलास्तदर्द्धं। ति याः
लाश्चतुषष्ठिसंख्याकाः पर्वद्वयसंमिताः वा। गुडशर्कराः पलार्द्धं। चरुर्ग्रासार्द्धं। कुक्कुटांडप्रमाणग्रासः। चंदनागर
कस्तूरीकर्पूरचंदनानि तिंदुकानिपि बीजमात्रानि। अपूपपत्रपुष्पफलान्येकैकं। इक्षुपर्वमात्रं। मातुलिंगकदली
फलानां चत्वारो भागः। नारिकेलस्याष्टमो भागः। बिल्वकस्योर्वारुकस्य त्रेधाभागः। कपित्थस्य द्विधा। दूर्वाणां

त्रयं ।। दशांगुलस्समर्ध्यः । चतुरंगुलगुडुचीद्वयांगुलगालता । मूलकंदानामार्द्धभागः । लवणस्तुक्तिमात्रं । ९ कविंशति
मरिचयः । कर्पूररराजन्वं बदरीमात्रं । रामठं हिंगु ज्ञात्वा वौविशेषमन्यतोग्राह्यं । द्रव्यस्त्रुवेणाहोतव्यं । कठिनंपाणिना
होतव्यं । यत्रद्रव्यंनोक्तंमुक्तमपि द्रव्यंसंभवति । तत्राज्यतिलमेवकल्पनीयं । यवाधिक्यआयुःक्षयः । यवसाम्यधनक्षयः ।
तिलाधिक्यसर्वकामनासिद्धिः । इति शिवपंचाक्षरीमुक्तावल्यांपंचांगोपासनोपयोगिदशकालादिकथनंनामपं
चमस्तरणिः । श्रीसांबसदाशिवायनमः ।। श्रीभवानीशंकरायनमः ।। श्रीमहाकालीमहालक्ष्मीमहासरस्वतीभ्योनमः ।। ५

५१

॥श्रीशिव॥ इति शिवपंचाक्षरीपुस्का व[illegible] पुस्तकं विष्णुभट्टस्यां

[OrderDescription]
,CREATED=17.02.20 15:22
,TRANSFERRED=2020/02/17 at 15:31:32
,PAGES=55
,TYPE=STD
,NAME=S0002841
,Book Name=M-2634-SHIVPANCHAHARI MUKTAVALI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,